Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सामगानां नित्यकर्म्मपद्धतिः ॥

106

मन्त्राचार्य्योपाधिक

अग्निहोत्रिणा श्री अग्निष्वात्त शास्त्रिणा

सम्पादितः

3/2

पाटलिपुत्र नगरस्थित

विहार पब्लिशिंग हाउस इत्यनेन

प्रकाशितः

अखिलं स्वत्वं सम्पादकेन स्वायत्तीकृतः

प्रथमं प्रकाशनम् (१९३५) मूल्यं रुप्यकार्धम्

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Śri Śri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्री १०८ पं० पद्मादत्त त्रिपाठी जी

श्री अग्निष्वात्त शास्त्री मन्त्राचार्यः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सामगानां नित्यकर्म्मपद्धतिः ॥



मन्त्राचार्य्योपाधिक

अग्निहोत्रिणा श्री अग्निष्वात्त शास्त्रिणा

सम्पादितः

पाटलिपुत्र नगरस्थित

विहार पब्लिशिंग हाउस इत्यनेन

प्रकाशितः

अखिलं स्वत्वं सम्पादकेन स्वायत्तीकृतः

प्रथमं प्रकाशनम् (१९३५) मूल्यं रुप्यकार्धम्

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राप्तिस्थानम्—

१. ग्रन्थकारसदनम्—१६३ देवनाथपुरा वाराणसी

२. विहार पब्लिशिंग हाउस, पटना

३. पण्डित पद्मादत्त त्रिपाठी

भारामल का बाग, पो० कनखल जि० सहारनपुर

४. पं० रघुनन्दनप्रसाद शुक्ल, बुकसेलर,

कचौड़ी गली बनारस सिटी

५. पं० मोहनलाल वेदपाठी,

श्रीवेद विद्यार्थी मण्डल, छोटी बस्ती, पो० पुष्कर,

अजमेर (राजपूताना)।

मुद्रकः—

दी यूनाइटेड प्रेस, लिमिटेड,

पटना।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ किञ्चित्प्रास्ताविकम्

अयि विश्वागहन मत्त मातङ्ग यूथपाः, आलोडित शास्त्र पारावारा विद्वद्धोरेया, सुविदित मेवात्र तत्रभवतां विदुषां यद्वाजसनेय शाखिनां शुक्ल यजुर्वेदीयानां कर्म्मकाण्ड ग्रन्थ रत्नाकराः नित्यानुष्ठान पद्धतयः कर्म्मकाण्ड दिग्गजैः पारावार पारीणै र्बहुभि र्महामहोपाध्यायै र्विद्वद्भिः स्वस्व देशाचारानुसारतः कुशलया लेखन्या सुलिखिताः सुप्रकाशिता वहुलतया दरीदृश्यन्तेऽस्माभिः।

परन्तु "वेदानां सामवेदोस्मो"ति भगवत्प्रथितस्य सामवेदस्य कर्म्मकाण्ड ग्रन्था "विद्ययासार्द्धंम्रियेत" इति नियमानुवर्त्तिभि रस्मत्पूर्वजैः सह दिवं गताः। अतस्तच्छाखीयाः कर्म्मकाण्डग्रन्थाननुपलभमाना धर्म्मलोपभिया याजुष कर्म्मकाण्ड सरणिं नित्यानुष्ठान सरणिञ्चानुसृत्य कथमपि स्वधर्म्मं रक्षन्ति। परन्तु—

यःस्वशाखोक्तमुत्सृज्य पर शाखोक्त माचरेत्।
अप्रमाण मृषिंकृत्वा सोऽन्धे तमसि मज्जति॥

इति—गोभिल पुत्रोक्ति वशाद्भोता अपि ग्रन्थाभावा दपारगा विमनायमाना स्तिष्ठन्ति।

परन्त्वधुना माभे रित्याश्वास्यते, यतः स्वशाखीयानां दुःखदुःखितै रल्मोड़ा कनखल निवासिभि रस्मद्गुरु चरणैः श्रीमद्भिः पण्डित धुरीणैः पद्मादत्त त्रिपाठिभिः प्रेरितेन मया कोथुमी शाखिनां

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राप्तिस्थानम्—

१. ग्रन्थकारसदनम्—१६३ देवनाथपुरा वाराणसी

२. विहार पब्लिशिंग हाउस, पटना

३. पण्डित पद्मादत्त त्रिपाठी

भारामल का बाग, पो० कनखल जि० सहारनपुर

४. पं० रघुनन्दनप्रसाद शुक्ल, बुकसेलर,

कचौड़ी गली बनारस सिटी

५. पं० मोहनलाल वेदपाठी,

श्रीवेद विद्यार्थी मण्डल, छोटी बस्ती, पो० पुष्कर,

अजमेर (राजपूताना)।

मुद्रकः—

दी यूनाइटेड प्रेस, लिमिटेड,

पटना।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ किञ्चित्प्रास्ताविकम्

अयि विद्यागहन मत्त मातङ्ग यूथपाः, आलोडित शास्त्र पारावारा विद्वद्धौरेया, सुविदित मेवात्र तत्रभवतां विदुषां यद्वाजसनेय शाखिनां शुक्ल यजुर्वेदीयानां कर्म्मकाण्ड ग्रन्थ रत्नाकराः नित्यानुष्ठान पद्धतयः कर्म्मकाण्ड दिग्गजैः पारावार पारीणै र्बहुभि र्महामहोपाध्यायै र्विद्वद्भिः स्वस्व देशाचारानुसारतः कुशलया लेखन्या सुलिखिताः सुप्रकाशिता बहुलतया दरीदृश्यन्तेऽस्माभिः।

परन्तु "वेदानां सामवेदोस्मो"ति भगवत्प्रथितस्य सामवेदस्य कर्म्मकाण्ड ग्रन्था "विद्ययासार्द्धंम्रियेत" इति नियमानुवर्त्तिभि रस्मत्पूर्वजैः सह दिवं गताः। अतस्तच्छाखीयाः कर्म्मकाण्डग्रन्थाननुपलभमाना धर्म्मलोपभिया याजुष कर्म्मकाण्ड सरणिं नित्यानुष्ठान सरणिञ्चानुसृत्य कथमपि स्वधर्म्मं रक्षन्ति। परन्तु—

यःस्वशाखोक्तमुत्सृज्य पर शाखोक्त माचरेत्।
अप्रमाण मृषिंकृत्वा सोऽन्धे तमसि मज्जति॥

इति—गोभिल पुत्रोक्ति वशाद्भोता अपि ग्रन्थाभावा दपारगा विमनायमाना स्तिष्ठन्ति।

परन्त्वधुना माभे रित्याश्वास्यते, यतः स्वशाखीयानां दुःखदुःखितै रस्मोड़ा कनखल निवासिभि रस्मद्गुरु चरणैः श्रीमद्भिः पण्डित धुरीणैः पद्मादत्त त्रिपाठिभिः प्रेरितेन मया कोथुमी शाखिनां

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गोभिलाचार्य मतानुसारिणां पर्वतीयानां सामवेदीयानां कृते महता प्रयत्नेनाकर ग्रन्था नालोच्य सम्यक् संगृहीत्यैषा नित्यकर्म्म प्रदर्शिनी पद्धतिका व्यरचि ।

विद्वांसः सज्जनाः अनेन सन्तोष पदवीमेत्य गुणग्रहणेन दोष परिवर्जनेनच मामनुगृहीष्यन्तीत्याशास्ते गुणैकग्राहिणां विदुषा मनुचरेण

अग्निहोत्रिणा श्री अग्निष्वात्त शर्मणा
मन्त्राचार्येण

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मंगलाचरणम्

गणनाथं नमस्कृत्य नमस्कृत्य सरस्वतीम् ॥
मङ्गलावाप्तये देवं मङ्गलायतनं हरिम् ॥१॥
ततो वंशधरं नौमि लक्ष्म्याः पुत्रं यशस्विनम् ॥
सरस्वती कृपा पात्रं मदीय जनकं कविम् ॥२॥
भार्गवप्रवरं वात्स्यगोत्रं सामविदाम्बरम् ॥
श्रौतस्मार्त्त विधौ दक्षं तदनुष्ठान कारिणम् ॥३॥
तपोधनञ्च यज्वानं शिष्याणाञ्च हितेरतम् ॥
ईश्वरस्यात्मजं देवं भारतस्य हि भूषणम् ॥४॥
ततः प्रसन्न वदना मप्रगल्भां शुभव्रताम् ॥
सन्तान पालन रतां सदा भर्तृ हिते स्थिताम् ॥५॥
प्रणमामि शरत्पूर्वां सुन्दरीं जननीं निजाम् ॥
यस्यानुध्यान मात्रेण सिद्धिः करतले स्थिता ॥६॥
ततः प्रसन्न वदनं हिमशैल निभं गुरुम् ॥
हिमालय कृतावासं पद्मादत्त त्रिपाठिनम् ॥७॥
ज्योतिर्विदं कर्म्मठञ्च सदनुष्ठान कारिणम् ॥
प्रणमामि सुशान्तं तं शिवं कनखल स्थितम् ॥८॥
अग्निष्वात्ताय दीनाय शास्त्राज्ञा पथवर्त्तिने ॥
आशीर्व्वादं प्रयच्छन्तो विघ्नास्तुष्टा हरन्तु च ॥९॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समर्पणपत्रम्

गुरो !

भवदीय मुखाम्भोजा दादेश ममृतोपमम् ॥
आकर्ण्यानुष्ठित मिदं त्वत्कृपालेश मात्रतः ॥१॥
त्वदीय महमेतच्च तुभ्यमेव समर्पये ॥
त्वयि प्रीते जगत्प्रीतं रुष्टे रुष्यति सर्वकम् ॥२॥
प्रकृष्टमप्रकृष्टं वा बालचापल मेववा ॥
यथावन्मन्यसे देव तथैव प्रतिगृह्यताम् ॥३॥

भवदीयोऽधमः शिष्यः
श्री अग्निष्वात्तः
(बटु शर्म्मा)

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयसूची

प्रातःस्मरणम्	१
प्रातःस्नानविधिः	४
प्रातःसन्ध्या प्रयोगः	५
प्रातरौपासन होमः	१५
देवपूजा	१६
ध्यानावाहने वैदिकमन्त्राः	२३
विष्णुसंहिता	३०
मध्याह्नस्नानविधिः	४२
मध्याह्नसन्ध्या	४९
तर्पणम्	५४
पृष्ठोदिविविधानम्	६१
वैश्वदेवः	६४
वलिहरणम्	६६
नित्यश्राद्धम्	६८
वाह्यवलयः	७०
भोजन विधिः	७५
सायं सन्ध्या विधिः	७६
आरात्रिक विधिः	८२
मन्त्र पुष्पाञ्जलिः	८४
शयने प्रार्थना	८४

परिशिष्टे

पक्षादिस्थालीपाकः	
पिण्डपितृयज्ञः	

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥❀॥ बिनीत प्रार्थना ॥❀॥

—:∞:—

नाना प्रकार के सांसारिक झञ्झटों में विशेष रूप से फंसे रहने से, अनवधानता से. कुछ प्रेस के नियमों की अनभिज्ञता से, बहुत सी त्रुटि व अशुद्धियां जो कि क्षमा के अयोग्य हैं, रह गये हैं। शुद्धि पत्र से. कृपा कर शोधन कर लेने की तथा क्षमा के अयोग्य अपराधों की भी क्षमा की, प्रार्थना करता हूं। बुद्धिमान सज्जन मेरे इस प्रयास को प्रथम जान कर, क्षमा करके, अपनी उदारता दिखायेंगे ऐसी आशा रखता हूं।

सामवेद के प्रेमी सज्जनों ने उदारता पूर्वक यदि इसको अपनाया तो आगामी संस्करण में त्रुटियां सुधार दी जावेंगी और अशुद्धि न रहने पावे, इसका विशेष ख्याल रहेगा।

आपका

अग्निषात्त शर्म्मा

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

* ओं अदृष्टपुरुषाय नमः *

❀ सामगानां नित्यकर्म्म पद्धतिः ❀

विघ्नेशं शारदां देवीं तथा संस्मृत्य गोभिलम् ॥
सामगानां हितार्थाय तदीयां कर्म्मपद्धतिम् ॥
सूत्रं भाष्यं समालोच्य देशाचारं विचिन्त्य च ॥
करामि विष्णुप्रीत्यर्थं भूयाच्च विदुषां मुदे ॥
जयति सगुरुर्वरेण्यः, कमलालया प्रदत्त सकल भूतिः ॥
यस्योपदेशा द्रचित, श्छन्दोग नित्ये सहचरोऽयम् ॥

अथ प्रातःस्मरणम्

तत्र ब्राह्मे उत्थाय, अन्यथा दोष स्मरणात्। ब्राह्म मुहूर्त्तश्च विष्णुपुराणे—रात्रेः पश्चिम यामस्य मुहूर्त्तोयस्तृतीयकः ॥
स ब्राह्म इति विज्ञेयो विहितः स प्रबोधने ॥
पञ्च पञ्च उषः कालः सप्त पञ्चारुणोदयः ॥
अष्ट पञ्च भवेत्प्रात स्ततः सूर्योदयः स्मृतः ॥
तथा च मनुः—ब्राह्मे मुहूर्त्ते बुद्धेयत धर्मार्थावनुचिन्तयेत् ॥
कायक्लेशांश्च तन्मूला न्वेदतत्त्वार्थ मेव च ॥
तत्र उत्थानाभावे दोषमाह रत्नावल्याम्-
ब्राह्मे मुहूर्त्ते या निद्रा सा पुण्यक्षयकारिणी ॥
तांकरोति द्विजो मोहात् पादकृच्छ्रेणशुद्धयति ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गण्डूष त्रितयं कृत्वा ईश्वरस्मरणम् तत्र वैदिको मन्त्रः—

प्रातरग्निः पुरुप्रियो विशस्तवेतातिथिः ॥
विश्वे-यस्मिन्नमर्त्ये हव्यं मर्त्तास इन्धते ॥१॥
प्रियोनो अस्तु विश्पतिर्होतामन्द्रो वरेण्यः ॥
प्रियाः स्वग्नयो वयम् ॥२॥
एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ॥
स्तुषेवा मश्विना बृहत् ॥ ३ ॥

अथ पौराणिकम् ॥

हेजिह्वे रससारज्ञे सर्वदा मधुर प्रिये ॥
नारायणाख्यं पीयूषं पिव जिह्वे निरन्तरम् ॥१॥
नारायणपरा वेदा नारायण परा मखाः ॥
नारायण परा मुक्ति र्नारायण परा गतिः ॥२॥
राम नारायणानन्त मुकुन्द मधुसूदन ॥
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन ॥३॥
हरेमुरारे मधुकैटभारे गोविन्द गोपाल मुकुन्द शौरे ॥
यज्ञेश नारायण कृष्ण विष्णो निराश्रयं मां जगदीश रक्ष ॥४॥
हरेकृष्ण हरेकृष्ण कृष्ण कृष्ण हरे हरे ॥
हरे राम हरे राम राम राम हरे हरे ॥५॥
त्रैलोक्य चैतन्य मयादिदेव श्रीकान्त विष्णो भवदाज्ञयैव ॥
प्रातः समुत्थाय तव प्रियार्थं संसार यात्रामनुवर्त्तयिष्ये ॥६॥
जानामि धर्मं नचमे प्रवृत्तिर्जानाम्यधर्मं नचमे निवृत्तिः ॥
त्वया हृषीकेश हृदि स्थितेन यथा नियुक्तोस्मि तथा करोमि ॥७॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्मा मुरारस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ॥
गुरुश्च शुक्रःशनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥८॥
भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहः सगोतमः ॥
रैभ्यो मरीचि श्च्यवनोमलोरुः कुर्वन्तुसर्वेमम सुप्रभातम्॥९॥
सनत्कुमारः सनकः सनन्दनः सनातनो प्यासुरि पिंगलौच ॥
सप्तस्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥१०॥
सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवराश्च सप्त ॥
भूरादि कृत्वा भुवनानि सप्त कुर्वन्तुसर्वे मम सुप्रभातम ॥११॥
पृथ्वी सगन्धा सरसा स्तथापः स्पर्शीच वायुर्ज्वलितंच तेजः ॥
नभःसशब्दं महता सहैव कुर्वन्तु सर्वे मम सुप्रभातम् ॥१२॥
इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा श्रृणुयाच्चतद्वत् ॥
दुस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात् ॥१३॥

अश्वत्थामा वलिर्व्यासो हनुमांश्च विभीषणः ॥
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥१४॥
सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयं तथाष्टमम् ॥
जीवेद्वर्षशतं सोपि सर्वव्याधि विवर्जितः ॥१५
श्रोत्रियं सुभगां गांच अग्निमग्नि चितिन्तथा ॥
प्रात रुत्थाय यः पश्येदापद्भ्यःस प्रमुच्यते ॥१६॥
अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा ॥
पंचकं ना स्मरेन्नित्यं महापातक नाशनम् ॥१७॥
पुण्यश्लोको नलोराजा पुण्यश्लोको युधिष्ठिरः ॥
पुण्यश्लोकाच वैदेही पुण्यश्लोको जनार्दनः ॥१८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अविमुक्त चरण युगलं दक्षिणा मूर्त्तेश्च कुक्कुट चतुष्कम् ॥
स्मरणमपि वाराणस्या निहन्ति दु.स्वप्न मपशकुनंच ॥१९॥
समुद्र वसने देवि पर्वतस्तन मण्डले ॥
विष्णु पत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्वमे ॥२०॥
इत्यादि प्रार्थनां कुर्यात् ॥

ततोग्रामाद्बहिः शौचागारेवा मलत्यागादनन्तरम् मृत्तिकया दशवारं वामकरं प्रक्षाल्य सप्तवारं करद्वयं प्रक्षाल्य त्रिवारं पदतलद्वयं प्रक्षाल्य पात्र शोधनंकृत्वा षोड़श गण्डूषान् कृत्वा उपवीतं कर्णादुत्तार्य प्रक्षाल्य आच.मेत् ॥ ततो दन्तधावनं कुर्यात् ॥ दन्तकाष्ठेन दन्त-धावने विशेषमन्त्रः

ओं आयुर्वलं यशोवर्चः प्रजाः पशु वसूनिच ॥
ब्रह्म प्रज्ञांच मेधांच त्वंन्नोधेहि वनस्पते ॥
इति । ततः स्नानं कुर्यात् ॥

अथ प्रातःस्नान विधिः ॥

नद्यां गृहे वा शीतेन उष्णेनवा जलेन स्नायात् तत्रादौ जलमादाय संकल्पं कुर्यात् । ओं विष्णुः३ अद्येहेत्यादि देशकालौ संकीर्त्त्य अमुकगोत्रः अमुकराशिः अमुकशर्म्माहं कृतकायिक वाचिक मानसिक सांसर्गिक ज्ञाताज्ञात सकल पापक्षय पूर्वकं देहशुद्ध्यर्थं प्रातः स्नानमहं करिष्ये ॥इति संकल्प्य स्नात्वा आर्द्रवसन एव जलमादाय स्नानांग तर्पणं करिष्ये इति संकल्प्य देवतीर्थेन देवास्तृप्यन्तु । देवपत्न्यस्तृ-प्यन्तु । देवसुतास्तृप्यन्तु। देवगणास्तृप्यन्तु। निवीती ऋषितीर्थेन ऋषय

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्तृप्यन्तु। ऋषिपत्न्य स्तृप्यन्तु। ऋषिसुता स्तृप्यन्तु। ऋषिगणा स्तृप्यन्तु अथ प्राचीनावीती पितृतीर्थेन पितर स्तृप्यन्तु । पितृपत्न्य स्तृप्यन्तु । पितृसुता स्तृप्यन्तु पितृगणा स्तृप्यन्तु ।। ततः उपवीती आब्रह्मस्तम्ब पर्यन्तं जगत्तृप्यन्तु इत्यञ्जलित्रयं निनीय जलाद्बहिः प्राचीनावीती ओं येचास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः। ते तृप्यन्तु मयादत्तं वस्त्र निवौड़नोदकम् इतिमन्त्रेण वस्त्रं निष्पीडयेत् ।। ततः उपवीती आचम्य गङ्गाष्टकं पुरुष सूक्तादि वा जपन् वस्त्र परिवर्त्तनं विधाय आसने उपविश्य प्रातः सन्ध्यामुपतिष्ठेन् ।।

अथ प्रातः सन्ध्या प्रयोगः ।।

तत्रादौ शुद्धं भस्म गृहीत्वा जलेन सम्यग्लेपनार्हं विधाय ।

ओंमानस्तोकइत्यस्य वसिष्ठऋषि र्जगतीच्छन्दः इन्द्रो देवता भस्माभिमन्त्रणे विनियोगः ।।

ओं मानस्तोके तनये मान आयौ मानो गोषु मानो अश्वेषु रीरिषः ।। वीरान्मानो रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।।

इत्यभिमन्त्र्य ओंत्र्यायुष मित्यस्य प्रजापति ऋषिर्यजुः प्रजापति-र्देवता भस्म लेपने विनियोगः ।।

ओं त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषगत्तास्त्य स्यत्र्यायुषं यद्देवानां त्र्यायुषं तन्मेअस्तु त्र्यायुषम् ।। इतिमन्त्रेण ललाटे ग्रीवायां अंसयोः बाह्वोः हृदये पृष्ठेच क्रमेण भस्मना त्रिपुण्ड्रं कुर्यात् ।। ततः ओं ब्रह्मवाणी सहस्रेण शिववाणी शतेन च। विष्णोर्नाम सहस्रेण

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिखाबन्धं करोम्यहम् ॥ इतिमन्त्रेण गायत्र्या वा शिखां बध्वा प्राङ्मुखः वामकरधृत कुशमुष्टिः आचामेत् ।

हृदयस्पृशं जलं ब्रह्मतीर्थेन ओंऋग्वेदाय स्वाहा ओं यजुर्वेदाय स्वाहा ओंसामवेदाय स्वाहेतित्रिः पीत्वा ओं अथर्ववेदायनमः इति हस्तं प्रक्षाल्य जलेन पादौ अभ्युक्ष्य शिरश्चाभ्युक्ष्य ओष्ठौद्विः परिमृज्य संहताभि रंगुष्ठा मध्यमामिकाभि मुखं अंगुष्ठतर्जनीभ्यां नासिके अंगुष्ठानामिकाभ्यां चक्षुषी श्रोत्रेच अंगुष्ठकनिष्ठिकाभ्यांनाभिं हस्ततलेन हृदयं सर्वै रंगुल्यग्रैः शिरः अंसौच स्पृष्ट्वा हस्तं प्रक्षाल्य एवं पुन राचामेत् ॥ एष एवाचमन क्रमः सामगानांम् ॥

ततो विष्णु स्मरणम् ॥ ओं तद्विष्णोः परमम्पदं सदापश्यन्ति सूरयः ॥ दिवीव चक्षुगततम् ॥ ओं अपवित्रः पवित्रोवा सर्वावस्थां गतोपिवा । यः स्मरेत्पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः ओं पुण्डरीकाक्षः पुनातु ॥ ततः संकल्पः ॥

ओं विष्णु विष्णु विष्णुर्नमः परमात्मने श्रीपुराण पुरुषोत्तमाय तत्सदद्य पृथिव्यां जम्बूद्वीपे भरतखण्डे आर्य्यावर्त्ते हिमवत्पर्वतैकदेशे ब्रह्मणो द्वितीय परार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वत मन्वन्तरे अष्टाविंशतितमकलियुगस्य प्रथमचरणे बौद्धावतारे षष्ठ्यब्दानांमध्ये अमुकनाम संवत्सरे अमुकायने अमुक ऋतौ अमुकमासे अमुकपक्षे अमुकवासरोपेतायामस्याममुक पुण्यतिथौ अमुकगोत्रः अमुकप्रवरः सामवेदीय कौथुमीशाखाध्यायी जन्मनामतः अमुकराशिः प्रसिद्ध नामतः अमुकराशिः अमुकशर्म्माहं आत्मसंस्कारार्थं अद्योपात्त

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सकलदुरितक्षयाय ब्रह्मलोकावाप्तये प्रातःसन्ध्योपासन महं करिष्ये इति संकल्प्य ।

ओंपृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मो देवता-आसनोपवेशने विनियोगः ॥ आसनं संस्पृश्य पठेत्

ओं पृथ्वित्वया धृतालोका देवित्वं विष्णुना धृता । त्वंच धारय मां देवि पवित्रं कुरु चासनम् ॥

ततो मार्ज्जनम् ॥ ओं भूःपुनातु ओंभुवः पुनातु ओंस्वः पुनातु ओं महः पुनातु ओंजनः पुनातु ओंतपः पुनातु ओंसत्यं पुनातु ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् पुनातु ॥

करन्यासः ॥ ओंभूः अंगुष्ठाभ्यां नमः ॥ ओं भुवस्तर्जनीभ्यां नमः ॥ ओं स्वः मध्यमाभ्यां नमः ॥ ओ तत्सवितुर्वरेण्यम् अनामिकाभ्यां नमः ॥ ओं भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यां नमः ॥ ओं धियोयोनः प्रचोदयात् करतल करपृष्ठाभ्यां नमः ॥

अंगन्यासः ॥ ओं भूः हृदयायनमः ॥ ओं भुवः शिरसेस्वाहा ॥ ओं स्वः शिखायैवषट् ॥ ओंतत्सवितुर्वरेण्यम् कवचाय हुम् ओं ॥ भर्गोदेवस्य धीमहि नेत्रत्रयाय वौषट् ॥ ओं धियोयोनः प्रचोदयात् अस्त्रायफट् ॥

ध्यानम् ॥ ओं गायत्रीं त्र्यक्षरां वालां साक्षसूत्रकमण्डलुम् । रक्तवस्त्रां चतुर्वक्त्रां हंस वाहन संस्थिताम् । ऋग्वेद कृतोत्संगां हार केयूर भूषितां । ब्राह्मगीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीं । आवाहयाम्यहं देवीं गायत्रीं सूर्य मण्डलात् । आगच्छवरदेदेवि त्र्यक्षरे ब्रह्मवादिनि । गायत्रि छन्दसां मात र्ब्रह्मयोनि नमोस्तुते ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततो जलेनात्मानं परिवेष्टय हस्ते जलमादाय—ओंकारस्य ब्रह्मा-ऋषि र्दैवीगायत्रीछन्दोग्निर्देवता सर्वकर्म्मारम्भे विनियोगः। सप्तव्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजात्रिगोतम वसिष्ठ कश्यपा ऋषयो गायत्र्युष्णिगनुष्टुबृहती पंक्ति त्रिष्टुब्जगत्य श्छन्दांसि अग्नि वाय्वादित्य बृहस्पति वरुणेन्द्र विश्वेदेवा देवता गायत्र्या विश्वामित्र ऋषि र्गायत्रीछन्दः सविता देवताः शिरसः प्रजापति ऋषिगायत्रीछन्दो ब्रह्माग्नि वायुसूर्या देवता प्रणायामे विनियोगः ॥

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियो योनः प्रचोदयात् ओं आपोज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् ॥ इति दश-प्रणव संयुक्तो मन्त्र. ॥

अंगुष्ठेन दक्षिणं नासापुटंबध्वा वामेन नासारन्ध्रेण श्वासं पूरयन् पुर्वोक्त मन्त्रस्य मानसिक जपः पूरक संज्ञः ॥ प्रदेशित्न्यावामंच नासापुटं बध्वा श्वासमत्यजन्नुक्त मन्त्रस्य मानसिक जपः कुम्भक संज्ञः ॥ अथांगुष्ठं मुक्त्वा दक्षिणेन नासारन्ध्रेण श्वासं शनैः शनै र्विरेचयन्नुक्त मन्त्रस्य मानसिक जपो रेचकसंज्ञः ॥ एष पूरक कुम्भक रेचकास्त्रयःप्राणायामः ॥ एवं त्रिःकृत्वा-मन्त्राचमनम् ॥
ओं सूर्यश्चेत्यस्यं ब्रह्मा ऋषिः प्रकृति श्छन्दः आपो देवतामन्त्राचमने विनियोगः।

ओं सूर्यश्च मा मन्न्युश्च मन्न्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्र्या पाप मकार्षम् मनसा वाचा हस्ताभ्यां पद्भ्या मुदरेण

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिश्ना रात्रिस्तदव लुम्पतु यत्किंच दुरितम्मयि इदमह मापोऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ इति जलं पीत्वाऽचम्य मार्जनं कुर्यात् ।

ओंकारस्य ब्रह्माऋषिर्दैवीगायत्री छन्दोऽग्निर्देवता, त्रिव्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजाऋषयः, गायत्र्युष्णिगनुष्टुभश्छन्दांᳬसि, अग्निवाय्वादित्या देवताः गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषि र्गायत्री छन्दः आपो देवताः मार्जने विनियोगः

ओंम् । ओंभूर्भूवःस्वः ॥ ओंतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयोनः प्रचोदयात् ॥ ओं आपोहिष्ठा मयोभुव स्तान ऊर्जेदधातन। महेरणाय चक्षसे ॥ ओं योवः शिवतमो रसस्तस्य भाजयतेहनः । उशतीरिव मातरः ॥ ओं तस्मा अरङ्गमामवो यस्यक्षयाय जिन्वथ । आपो जनयथा च नः ॥ इत्येतैर्मन्त्रैर्जलेन मार्जनं कृत्वा अघमर्षणं कुर्यात् ॥

ऋतञ्चेत्यादीनामघमर्षण ऋषि रनुष्टुप् छन्दो भाववृत्तं दैवत मघमर्षणे विनियोगः ॥

ओंऋतञ्च सत्यञ्चाभीद्धा त्तपसोऽ अध्याजयत ॥
ततो रात्र्यजायत ततः समुद्रोऽ अर्णवः ॥
समुद्रादर्णवा दधि संवत्सरो अजायत ॥
अहोरात्राणि विदध द्विश्वस्य मिषतोवशी ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ॥
दिवञ्च पृथिवीञ्चान्तरिक्षमथोस्वः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति पठित्वा हस्तस्थोदके नासिका मवधाय श्वासं त्यक्त्वा तास्मिन्नुदके सर्वपापं गतमिति मत्वा तदुदकं वहिः प्रक्षिप्य हस्त-क्षालनं कृत्वा तिष्ठन् गायत्र्या सूर्याय त्रिरर्घ्यं दद्यात् ॥

ओं गायत्र्या विश्वामित्र ऋषि र्गायत्रीछन्दः सविता देवता सूर्यायाञ्जलि दाने विनियोगः ॥

ओं तत्सवितुर्वरेण्यम्भर्गोदेवस्य धीमहि ॥ धियोयोनः प्रचो-दयात् ॥ ततः ऊर्ध्वबाहुः सूर्यमुपतिष्ठेत् ॥

ओं उदुत्य मित्यस्य प्रस्कण्व ऋषि र्गायत्री छन्दः सविता देवता चित्रमित्यस्य कौत्स ऋषि स्त्रिष्टुप् छन्दः सविता देवता सूर्यो-पस्थाने विनियोगः ॥

ओं उदुत्य जातवेदसन्देवम्वहन्ति केतवः ॥ दृशे विश्वाय सूर्यम् ॥

ओं चित्रंदेवाना मुदगादनीकंञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावा पृथिवी अन्तरिक्षं सूर्य आत्मा जगत स्तस्थुषश्च ॥

इति सूर्यमुपस्थाय ध्यानम् ॥

ओं कुमारी मृग्वेद युतां ब्रह्मरुपां विचिन्तयेत् ॥

हंसस्थितां कुशहस्तां सूर्यमण्डल संस्थिताम् ॥

इति ध्यात्वा—

ओंकारस्य ब्रह्माऋषि र्दैवी गायत्री छन्दोग्नि र्देवता व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजा ऋषयः गायत्र्युष्णिगनुष्टुभश्छन्दांᳬसि

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अग्नि वायु सूर्या देवता गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता जपे विनियोगः ॥

ओं भूः ओं भुवः ओं स्वः ओं ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयात् ओं ॥

इत्थम् षट्प्रणव संयुक्तां व्याहृतित्रयसहितां वेदमातरं गायत्रीं अवहितमनाः अष्टवारं एकादशवारं द्वादशवारं पञ्चदशवारं शतवारं सहस्रवारंवा जपंविधाय अनेन एतावत् संख्यक गायत्रीजपेन भगवान् ब्रह्मस्वरुपी सविता प्रीयताम् । केचिद्विप्रणवां केचित्त्रिप्रणवांच गायत्रों जपन्ति परन्तु गोभिल परिशिष्टे व्याहृतिञ्च प्रतिप्रणवां गायत्रीञ्च प्रति प्रति ॥ षट्प्रणव संयुक्ता गायत्र्या जपलक्षणम् इति षट्प्रणव संयुक्ताया गायत्र्या जपःस्पष्टतया विहितः येच एतत्सन्न्यासि परमिति वदन्ति तेतु अन्यशाखीयाः, साम शाखिनां तु अयमेव विधिरत स्तदेव मयात्रस्थापितम् ॥ ततः एतानि सामानिगायेत् ॥ तद्यथा—

हरिः ओम् ॥ उदुत्यम् । ओहायि । जा । तवे २ दा २३४ साम् । देवम्बहा । तीकेतां २३४वाः । दा २३४ र्शे हायि । वायिश्वायसू । र्याम् । औ २३ होवा । हो ५इ । डा ॥१॥ गेयगान १।२।१६ ॥

हाउ ।३। भ्राजा भ्राज ।३। आयुरायुः ।३। उदुत्यंजा ।३। तवेदसम् ।३। चित्रन्देवानामुदगादनी २३ काम् । हाउ ।३। भ्राजा भ्राज ।३। आयुरायुः ।३। देवम्बहा ।३। चक्षुर्मित्रस्य वरुणास्य आ २३ ग्राइयिः । हाउ ।३। भ्राजा भ्राज ।३। आयु रायुः ।३। तिकेतवः ।३। आप्रा द्यावा

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पृथिवीआन्तरी २३ म् । हाउ ।३। भ्राजाभ्राज ।३। आयुरायुः ।३। दृशे विश्वा।३। सूर्यआत्मा जगतस्तास्थुषा २३श्चा ३ । हाउ।३। भ्राजा भ्राज ।३। आयुरायुः ।३। यस्सूर्यम् ।२। यसू २३ रियाउ । वा ३। ए३। देवादिवाज्योती २३४५: ।।२।। आरण्य गान ।। ६ २।१६।।

उद्वयाम् । तमसस्पारी२ । ज्योतिः पश्यन्त उत्तरा २म् स्वः पश्यन्त उत्तरा २म् । देवंदेवत्रा २सू २३४ रीम् । अगन्म ज्योति रुत्तमा १म् । स्वसार आतोतुन आतो तू ३४ । औहोवा ।। ऊ २ वातः ।३। वातो वातः ।२। वातो नृम्णानिपुरा ३याः । यमोहाउ ।३। पितरो हाउ ।३। भारण्डो हाउ ।३। इमाꣳस्तो २३४ माम् अर्हाते २३४ जा । तावेदसे ३। होइ । होइये ३।३। होइये ।३। ऊ २ वातः ।३। वातोवातः ।२। वातो नृम्णानि पुरा ३ याः । यमोहाउ ।३। पितरोहाउ ।३। भारण्डोहाउ ।३। रथामी २३४ वा । सम्माहे २३४ मा । मानीषया ३। होइ । होइये ३।३। होइये ।३। ऊ २वातः ।३। वातोवातः ।२। वातो नृम्णानिपुरा ३याः । यमोहाउ ।३। पितरो हाउ ।३। भारण्डो हाउ ।३। मद्राही २३४ नाः । प्रमाती २३४ रा । स्यासꣳसदे ३। होइ । होइये ३।३। होइये ।३। ऊ २ वातः ।३। वातोवातः ।२। वातोनृभ्याणानि पुरा ३याः । यमो हाउ ।३। पितरो हाउ ।३। भारण्डो हाउ ।३। आग्नायि सा २३४ ख्यायि । मारायिषा २३४ मा । वायन्तवा ३। होइ । होइये ३।३। होइये ।३। ऊ २ वातः ।३। वातोवातः ।२। वातोनृम्णानिपुरा ३ याः । यमोहाउ ।३। पितरोहाउ ।३। भारण्डोहाउ ।२। भारण्डा २३४ औहोवा ए । वातो नृम्णानि पुर यद्यमः पितरो भारण्डः ।२। ए । वातो नृम्णानि पुरयद्यमः पितरो भारण्डा २।ई २३४५ ।। परिशिष्टगाने ।।३।।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हाउ २हाउ। ओहा ।२। ओहाइ । इहौहो ।३। इहियो ।३। हुम् ।३। हो ।३।हँ ।३। इड़ा ।३। ऋतम्मे ।३। हस् ।३। प्रक्षस्य वृष्णो अरुषस्य नूमा २३ हाः। प्रनोवचो विदथा जातवेदा २३ साई । वैश्वानरायमतिर्नव्यसेशू २३ चीः। सोम इव पवतेचारु रग्ना २३ या३यि। हाउ २ हाउ। ओहा ।२। ओहायि। इहौहो ।३। इहियो ।३। हुम् ।३। हो ।३। हँ ।३। इडा ।३। ऋतम्मे ।३। हस् ।२। हा २३४ औहोवा। इहौहो। भद्रम्। इहौहो। श्रेयः। इहौहो वामम्। इहौहो। वारम्। इहौहो। सुवम्। इहौहो। अस्ति। इहौहो। अभ्राजीत्। इहौहो। ज्योतिः। अभ्राजीत्। इहौहो। दीदिवः। ए २३। हिया हाउवा ३। भा २३४५ स् ॥४॥ आ. ६।१।४॥

हाउ३वा। प्रागन्य दनुवर्त्तते रजोपागन्यत्तमो पेषतिभ्यसा। हाउ ।३। उदुत्यञ्जाता ३ वाइदा १ सा २३ म्। हाउ३वा। प्रागन्यदनुवर्त्तते रजोपागन्यत्तमो पेषतिभ्यसा। हाउ ।३। देव म्वहन्ती ३ कायिता १ वा २३ः। हाउ ३वा। प्रागन्यदनुवर्त्तते रजोपागन्यत्तमो पेषति भ्यसा। हाउ ।३। दृशे विश्वाया ३ सूरा १ या २३ म्। हाउ ३ वा। ए। अरुरुच दूघर्मो अरुरुच दुषसां दिवि सूर्यो विभाती २३४५ ॥५॥ आ. ४।२।५॥

उन्नयामि। होइ ।३। आदित्यं प्राञ्चंयन्त मुन्नयामि। होइ ।३। अहो रात्राण्यरित्राणि। होइ ।३। द्यौर्नौर्हाउ ।३। तस्यामसावादित्यईयते हाउ ।३। तस्मिन्वय मीयमान ईयामहे हाउ ।३। ईयामहे हाउ ।२। ईयामहे ३। हाउवा। प्रिये धामँस्त्रियक्षरे ।२। प्रिये धामँस्त्रियक्षरे २३४५ ॥ आ. ६।२।२१ ॥६॥

ओं तत्सवितुर्वरेणियोम्। भार्गोदेवस्य धीमाही २। धियो

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

योनः प्र । चो १२१२ हुम् । आ २ दायो । आ २३४५॥ तेजोवै गायत्री छन्दसां तेजो रथन्तरꣳसाम्नां तेजश्चतुर्विंश स्तोमाना न्तेज एव तत्सम्यक् सन्दधात्यपिह पत्रस्य पुत्र स्तेजस्वी भवति ॥७॥

एषोउषाः । आपूविया । व्यूच्छति ! होवा ३ हाइ । प्रियादा २३ यिवा ३४ः । स्तुपा ३४इ वामा ३ । श्विनो २३४ वा वृ ५ हो हायि ॥ ८॥ इति प्रातः सन्ध्यान्ते गेय गानानि ॥

गानाशक्तौऋचस्त्रिधा पठेदिति भवदेवः ॥ अत एषां ऋचः प्रदर्श्यन्ते ॥

ओं उदुत्यं जातवेदसं देवम्बहन्ति केतवः ॥ दृशे विश्वाय सूर्यम् ॥१॥ चित्रन्देवाना मुदगादनीकञ्चक्षु र्मित्रस्यवरुणस्याग्नेः ॥ आप्रा द्यावापृथिवी अन्तरिक्षंꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥२॥ उद्वयं तमसस्परि ज्योतिःपश्यन्त उत्तरम् स्वः पश्यन्त उत्तरम् ॥ देवन्देवत्रा सूर्य मगन्म ज्योति रुत्तमम् ॥३॥ प्रक्षस्यवृष्णो अरुषस्य नूमहः प्रनोवचो विदथाजातवेदसे । वैश्वानराय मतिर्नव्यसे शुचिः सोमइव पवते चारुरग्नये ॥४॥ प्रागन्यदनुवर्त्तते रजोपागयत्तमो पेषतिभ्यसा ॥५॥ उन्नयाम्यादित्यंप्राञ्चंयन्त मुन्नयाम्यन्होरात्राण्यरित्राणि ॥ द्यौर्नतस्यामसा वादित्यईयते तस्मिन्वय मीयमान ईयामहे प्रियेधामꣳ स्त्र्यक्षरे ॥६॥ तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि ॥ धियोयोनः प्रचोदयात् ॥७॥ एषोउषा अपूव्या व्युच्छति प्रियादिवः ॥ स्तुषेवा म श्विनावृहत् ॥८॥ ततो विष्णुसहस्रनाम महापुरुषविद्या षट्पदीस्त्रो त्रादीश्वरस्तुतीर्विधाय अनेन प्रातः सन्ध्योपासनेन सर्वान्तरात्मा परमेश्वरः प्रीयतान्नमम । ओं यदक्षर पदभ्रष्टंमात्रा हीनं च यद्भवेत् तत्सर्वंक्षम्यतादेव न्प्रसीद परमेश्वर ॥ इतिप्रातः सन्ध्योपासन प्रयोगः॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ प्रातरौपासन होमः ॥

अग्निं प्रादुष्कृत्य सम्यक् समिन्ध्य अनुगुप्ता अपः समिद्वयंत्रिः प्रक्षालितास्तण्डुलाः अपाम्पूर्णं चमसं चासाद्य संकल्पः अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रः अमुक राशिरमुकशर्म्मा सपत्नीकोहं आत्मसंस्कारार्थं प्रातरौपासन होममहं करिष्ये ॥ इतिसंकल्प्य

इदंभूमेरित्यस्य प्रजापति ऋषि रनुष्टुप् छन्दोग्निर्देवता भूमिजपे विनियोगः अग्नेः पश्चान्न्यंचौ पाणीकृत्वा ।

ओं इदं भूमेर्भजामह इदभद्रꣳसुमङ्गलम् ॥ परासपत्नान् वाधस्वान्येषां विन्दते धनम् ॥ ततः उदकाञ्जलीन् क्रमशः नैऋत्या दाग्नेयान्तम् नैऋत्या द्वायव्यान्तं वायव्या दीशानान्तं प्रसिञ्चेत्

एषांत्रयाणां मन्त्राणां प्रजापति ऋषिरेकपदा गायत्रीछन्दोदित्यनुमति सरस्वत्यो देवताः उदकाञ्जलिसेके विनियोगः ओं अदितेऽनुमन्यस्व ॥ ओंअनुमतेऽनुमन्यस्व ॥ ओं सरस्वत्यनुमन्नयस्व ॥ ततोऽञ्जलिनोदकमादायअग्निं परिषिञ्चेत् ॥

अस्यन्मत्रस्य प्रजापतिऋषिर्यजुः सवितादेवता पर्य्युक्षणे विनियोगः ॥ ओं देवसवितः प्रसुवयज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गधर्न्वःकेतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥ इति अग्निं परिषिंच्य एकांसमिधं तूष्णीमग्नौ हुत्वा हस्तेनैवतण्डुलस्यार्द्धं गृहीत्वा ओं सूर्यायस्वाहा इति जुहुयात् इदं सूर्याय नमम ॥ शेष मर्द्धं गृहीत्वा ओं प्रजापतये उपांशु, स्वाहेत्युच्चैरुच्चार्य जुहुयात् इदं प्रजापतये नमम ॥ अथ द्वितीयां समिधं तूष्णी मग्नौ हुत्वा चमसोदकेन परितो-

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धारां दद्यात् ओं देवसवितः प्रसुवयज्ञं प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥ इति ततःपूर्ववत् नैर्ऋत्यादाग्नेयान्तं नैर्ऋत्या द्वायव्यान्तं वायव्यादीशानान्तं पृथक् प्रसिञ्चेत् ॥ ओं आदितेऽन्वमँ स्थाःततः ओं अनुमतेऽन्वमँ स्थाः ओं सरस्वत्यन्वमँस्थाः इति ततः अग्निं त्रिः प्रदक्षिणीकृत्य चमसजलंनिनीय पुनः पूरयित्वा प्रार्थयेत् ।

ओं आरोग्य मायुरैश्वर्यंधी र्धृतिः शंवलं यशः ।
ओजोवर्चः पशून्वीर्यं ब्रह्मब्राह्मण्यमेवच ।
सौभाग्यंकर्म सिद्धिञ्च कुलज्येष्ठं सुकर्तृताम् ॥
सर्वमेतत्सर्वं साक्षिन् द्रविणोदो रिरीहिणः
इति ततः अनेनप्रातारौपासन होमेन ॥

श्री भगवान्सर्वान्तरात्मा यज्ञपुरुषः प्रीयतान्नमम ॥ ततोनमस्कुर्यात्

ओं चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच ॥
हूयते च पुन र्द्वाभ्यां तस्मैयज्ञात्मने नमः॥१॥
काण्डद्वयोपपाद्याय कर्म्मब्रह्मस्वरुपिणे ॥
स्वर्गापवर्गदात्रेचयज्ञेशाय नमोनमः ॥२॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥
तस्मा त्कारुण्य भावेन रक्ष रक्ष हुताशन ॥३॥
इति प्रणम्य देव पूजां कुर्यात् ॥

अथ देव पूजा ॥

तत्रादौ पूजा सम्भारान्यथासम्भवं सम्भृत्य दीपं प्रज्वाल्य अक्षतान् गृहीत्वा स्वस्तिवाचनं कुर्यात् ॥

ओं सोमँ राजानंवरुणाम् । अग्निमन्वारभामहे ३। होवा ३ हायि । आदित्यम्विष्णुँ सूर्यम् । होवा ३ हायि ॥ ब्रह्माणा २३ श्चा । ३ होवा ३ हायि । वृहा ३ उवा ३ । पा २३४ तीम् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सोमंराजानंवरुणमग्निमन्वारभामहे ॥ आदित्यंविष्णुंसूर्यं ब्रह्माणञ्च बृहस्पतिम् ॥१॥

भद्रंकर्णेभिः शृणुयामदेवा भद्रम्पश्येमाक्षभि र्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभि र्व्यशेमहि देवहितंयदायुः ॥२॥

स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषाविश्व वेदाः । स्वस्तिन स्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥३॥

ओं स्वस्ति ओं स्वस्ति ओं स्वस्ति इति त्रिरक्षतान् प्रक्षिप्य पुष्पाणि गृहीत्वा ।

ओंसुमुखश्चैकदन्तश्चकपिलो गजकर्णकः ॥
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रोगजानन : ॥
द्वादशैतानि नामानि यः पठे च्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
विघ्नवल्ली कुठारायश्रीगणाधिपतये नमः ॥
शुक्लाम्बरधरंविष्णुंशशिवर्णं चतुर्भुजं ॥
प्रसन्नवदनंध्यायेत् सर्वविघ्नोपशान्तये ॥
शान्तं पद्मासनस्थं शशिमुकुटधरं पंचवक्त्रं त्रिनेत्रं
शूलंवज्रंच खड्गं परशुमभयदं दक्षिणांगे वहन्तं ॥
नागं पाशंच घण्टां डमरुक सहितं सांकुशं वामभागे
नानालंकारयुक्तं स्फटिक मणिनिभंपार्वतीशं नमामि ॥
जयन्ती मङ्गलाकाली भद्रकाली कपालिनी ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दुर्गाक्षमा शिवाधात्री स्वाहा स्वधा नमोस्तुते ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥
येषा मिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥
जवाकुसुमसंकाशं काश्यपेयं महाद्युतिं ॥
ध्वान्तारिं सर्वपापघ्नं प्रणतोस्मि दिवाकरम्॥.
इति पुष्पाञ्जलिं समर्प्य अर्घ्यस्थापनं कुर्यात् ॥ तद्यथा :—

भूमौ चन्दनेन त्रिकोणं वृत्तं चतुरस्र मण्डलं विलिख्य तदुपरि शंखचक्रे लिखित्वा पुष्पासनं आसनोपरिपात्रं पात्रेपवित्रं ओंपवित्रेस्थो वैष्णव्यौ इति ततः ओं शन्नोदेवी रभिष्टये शन्नो भवन्तु पीतये ॥ शंयो रभिस्रवन्तुनः ॥ इति अर्घ्यपात्रं जलेनापूर्य अंकुश मुद्रया ओं गंगेच यमुनेचैव गोदावरि सरस्वति ॥ नर्मदेसिन्धुकावेरि जलेऽस्मिन् सन्निधिंकुरु इति जलमालोड्य तीर्थान्यावाह्य ताम्रस्थाल्यांसूर्य-लिखित्वा ।

ओं अरुणोरुण पंकजे निषण्णः कमले भीतिवरौ करैर्दधानः ॥ स्वरुचाहितमण्डलस्त्रिनेत्रो रविराकल्पशताकुलोवतान्नः ॥ इति सूर्यंध्यात्वा अर्घ्यपात्रं गृहीत्वा ओं एहिसूर्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकम्पय मां भक्तं गृहाणार्घ्यं दिवाकर ॥ ओं नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे । जगत्सवित्रे शुचये सवित्रे कर्म्म दायिने इदमर्घ्यं श्री सूर्यायनमः ॥ इति सूर्यायत्रिरर्घ्यं दत्त्वा-ओं नमोस्तु सूर्याय नमोस्तु भानवे नमोस्तु वैश्वानर जातवेदसे ॥ ममेद मर्घ्यं प्रतिगृह्न देव देवादि देवाय नमो नमस्ते ॥ इति नमस्कृत्य ।

भूतोत्सादनं कुर्यात् ॥ अक्षतान् गृहीत्वा ओं अपसर्पन्तु तेभूता

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

येभूता भूमिसंस्थिताः ॥ येभूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया । अपक्रामन्तु भूतानिपिशाचाः सर्वतोदिशः ॥ सर्वेषामविरोधेन पूजाकर्म समारभे ॥ ऊर्ध्वोर्ध्व तालत्रयेण दिव्यान्, तिरम दृष्टया वलोकनेनान्तरिक्षगान्, भूमौ वामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सारयन्नक्षतान् सर्वदिक्षु विकिरेत् ॥ ततः ओंकार सहित दश छोटिकाभि र्दिग्वन्धनंकृत्वा ॥

गन्धाक्षतै रासनं पूजयेत् ओं आधार शक्तयेनमः ओंपृथिव्यैनमः ओं कूर्मायनमः ओं अनन्तायनमः ॥ आधारशक्ति कमलासनायनमः ओंपृथ्वीति मन्त्रस्य मेरुपृष्ठऋषिः सुतलंछन्दः कूर्मोदेवता आसनोपवेशने विनियोग ॥ आसनं धृत्वा-ओं पृथ्वित्वया धृतालोका देवित्वं विष्णुना धृता ॥ त्वंचधारय मांदेवि पवित्रंकुरुचासनम् ॥ ततः प्रणवेन प्राणायामं विधाय पुनरर्घ्य स्थापनं पूर्वोक्तरीत्या कृत्वा तेनजलेनात्मानं पूजा सामग्रींच सम्प्रोक्ष्य संकल्पं कुर्यात् ॥

ओं विष्णुः३र्नमः अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रः अमुकराशिः अमुकशर्म्माहं आत्मसंस्कारार्थं श्रीविष्णुपंचायतन देवता प्रीत्यर्थं यथा मिलितोपचारैः श्रीविष्णुपंचायतन पूजनं करिष्ये ॥

प्रसङ्गात् पंचायतन स्थापन प्रकार उच्यते ॥
तत्र पंचायतन देवताः ॥
आदित्यं गणनाथं च देवीरुद्रंच केशवम् ॥
पंचदैवत्य मित्युक्तं सर्वकर्म्मसु पूजयेत् ॥
तत्स्थापन प्रकारः विष्णुपंचायतनम् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदातुमध्ये गोविन्द मीशान्यां शंकरंयजेत् ॥
आग्नेय्यां गणनाथश्चनै ऋत्यांतपनं तथा ॥
वायव्या मम्बिकांचैव यजेन्नित्यंसमाहितः ॥
विष्णु शिव गणेशसूर्यदेवी ॥

गणेश पंचायतनम् ॥

हेरम्वंतु यदामध्ये ऐशान्या मच्युतंयजेत् ॥
आग्नेय्यां पंचवक्त्रंतु नैऋत्यां द्युमणियजेत् ॥
वायव्याम म्बिकांचैव यजेन्नित्य मतन्द्रितः ॥
गणेश विष्णु शिवसूर्यदेवी ॥

शिवपंचायतनम् ॥

यदातु शंकरं मध्ये ऐशान्यां श्रीपतियजेत् ॥
आग्नेय्यां च तथा हंसंनैऋत्यां पार्वतीसुतम् ॥
वायव्यांचतदापूज्या भवानी भक्तवत्सला ॥
शिव विष्णु सूर्य गणेश देवी ॥

देवीपंचायतनम् ॥

भवानींतु यदामध्येऐशान्यां माधवं यजेत् ॥
आग्नेय्यां पार्वतीनाथं नैऋत्यां गणनायकम् ॥
प्रद्योतनंतुवायव्या माचार्यस्तु प्रपूजयेत् ॥
देवी विष्णु शिव गणेश सूर्य ॥

सूर्यपंचायतनम् ॥

सहस्रांशु र्यदामध्ये ऐशान्यां पार्वती पतिम् ॥
आग्नेय्या मेकदन्तं चनैऋत्या मच्युतं तथा ॥
वायव्यां पूजयेद्देवीं भागमौक्षैक भूमिकाम् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूर्यशिव गणेश विष्णु देवी ॥
स्वस्थान वर्जिता देवाः शोकदुःख भयप्रदाः ।
अत्र विष्णु पंचायतनपूजां प्रदर्श्य
सर्वपंचायतनपूजा प्रकारः प्रदर्शिष्यते ॥
पूजकेन स्वकीयेष्टानुसारतः स्वकीय पंचायतनंपूर्वोक्त
प्रकारेण संस्थाप्यएभिरेव मन्त्रैः पूजितव्यम् इतिदिक् ॥

प्रथमं प्रत्येकं पृथक्पृथक् आवाह्य ध्यायेत् विष्णु पंचायतनपूजायां मादौ विष्णोरावाहनम् ।

आवाहये तं गरुड़ोपरि स्थितं रमार्द्धदेहं सुरराज वन्दितम् ॥
कंसान्तकं चक्रगदाब्ज हस्तं भजामिदेवं बसुदेव सूनुम् ॥

ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगन सदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिभि र्ध्यानगम्यम्
वन्दे विष्णुं भवभयहरं सर्वलौकैक नाथम् ॥

ततः शिवस्यावाहनम् ॥

एह्येहिगौरीश पिनाकपाणे शशांकमौले वृषभाधिरुढ़ ॥
देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥

ध्यानम्

ध्याये नित्यंमहेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशु मृगवरा भीतिहस्तंप्रसन्नं ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पद्मासीनं समन्तात्स्तुत ममरगणै र्व्याघ्रकृत्तिवसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥

ततो गणेशस्यावाहनम् ।

आवाहये तं गणराजदेवं रक्तोत्पलाभासमशेषवन्द्यम् ॥
विघ्नान्तकं विघ्नहरं गणेशं भजामिरौद्रं सहितं च सिद्धया ॥

ध्यानम्

खर्वं स्थूलतनुं गजेन्द्र वदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्ध मधुप व्यालोल गण्डस्थलं ॥
दन्ताघात विदारितारि रुधिरैः सिन्दूरशोभाकरं
वन्देशैल सुतासुतं गणपतिं सिद्धिप्रदंकामदम् ॥

ततः सूर्यस्यावाहनम् ॥

आवाहयेतं द्विभुजं दिनेशं सप्ताश्ववाहं द्युमणिं ग्रहेशम् ॥
सिन्दूरवर्णप्रतिमावभासं भजामिसूर्यं कुलवृद्धिहेतोः ॥

ध्यानम्

रक्ताम्बुजासन मशेष गुणैक सिन्धुं
भानुं समस्त जगता मधिपं भजामि ॥
पद्मद्वया भयवरान् दधतं कराब्जै
र्माणिक्य मौलि मरुणांगरुचिं त्रिनेत्रम् ॥

ततो देवीमावाहयेत्

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्यामांगीं शशिशेखरां निजकरैर्दानंच रक्तोत्पलं
रत्नाढ्यं कलशं परं भयहरं सम्बिभ्रतीं शाश्वतीम् ॥
मुक्ताहारलसत्पयोधरनतां नेत्रत्रयोल्लासिनीं
मावाहेत्सुरपूजितां हरवधूं रक्तारविन्द स्थिताम् ॥

ध्यानम्

कालाभ्राभां कटाक्षै ररिकुल भयदां मौलिबद्धे न्दुरेखां
शंखं चक्रं कृपाणं त्रिशिखमपिकरै रुद्वहन्तीं त्रिनेत्राम् ॥
सिंहस्कन्धाधिरुढां त्रिभुवन मखिलंतेजसा पूरयन्तीं
ध्याये दुर्गां जयाख्यांत्रिदश परिवृतांसेवितां सिद्धिकामैः ॥

अथ ध्यानावाहने वैदिक मन्त्राः ॥

विष्णुः

ओं इदं विष्णु र्विचक्रमे त्रेधानिदधे पदम् ॥ समूढ़ मस्य-पाꣳसुले ॥१॥

इदा ५ मे । विष्णूर२ः । विचक्रा २३४ मायि । त्रायिधानि । दधायिपा १ दा२म् । समू २ हो १ । ढा २३ मा ३ । स्या २ पा २३४ औहोवा । ए ३ । सुले १ ॥१॥

शिवस्य

ओं आवो राजान मध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ॥ अग्निम्पुरास्तनयित्नो रचित्ताद्विरण्यरुप मवसेकृणुध्वम् ॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आवोराजा । नमध्व । रस्यरुद्राम् । हो । ता । राम् । सात्ययजा ३म् । रोदसीयोः । अग्निम्पु । रा । तन्नायि । त्नोग्चित्तात् । हिरण्य । रु । पा ३ मव । सा ३४३ यि । का ३ र्ण् ध्वा ६५६ म् ॥१॥

गणेशस्य

ओं आतून इन्द्रक्षुमन्तं चित्रंग्राभंसंगृभायं ॥ महाहस्ती दक्षिणेन॥१॥

आतुनआ । द्रक्षुमा २३ न्ताम् । चाइत्रंग्राभा २३ ँहायि । सँ गृभा २३४ या । महा २३ । हा २ स्ता २३४ औहोवा । दक्षिणे ३ ना २२४५ ॥१॥

सूर्यस्य

ओं वण्महा ँ असिसूर्य वड़ादित्य महा ँ असि ॥
महस्ते सतो महिमा पनिष्टम महादेवमहा ँ अभि ॥१॥
वण्महा३ ँ असि सूर्या । बाड़ादित्य । महा ँ आ १ सा २३४इ ।महस्तेसतोमहिमा पनि । ष्टा ३मा । महादा २३इ वा ३ । महो २३४ वा । आ ५ सो ६ हायि ॥१॥

देव्याः

ओं उभेयदिन्द्ररोदसी आपप्रथोषा इव ॥ महान्तंत्वा महीना ँ सम्राजञ्चर्षणोनाम् ॥ देवीजनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१॥

उभेयदिन्द्ररोदसायि । आ २३ पा । प्राथउषा ३१ उवा २३। इव आ । महान्तन्त्वा माहायिनाम् । सम्रौ३हो । जंचर्षणा ३१ उवाये ३ ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ना३मा। देवीजनित्रियाजी १ जाना २ त। भद्रौ ३ हो। जानित्रियजा ३१ उवा २३ । ए ३। जनदा ३२ ॥१॥

एवं स्वस्वेष्ट पंचायतनानुक्रमेण आवाहनं ध्यानञ्चकृत्वा पाद्याद्युपचारै रेकत्र पूजयेत्। तत्रवैदिकाः पौराणिकाश्चमन्त्राः प्रदर्श्यन्ते ॥

आसनम्

ओं कोअद्ययुंक्ते धुरिगा ऋतस्य शिमीवतो भामिनोदुर्ह्णायून् ॥ आसन्नेषा मप्सुवाहो मयोभूयएषां भृत्यामृणधत्स जीवात् ॥१॥

कोअद्ययुंक्ते धुरिगा ऋतस्या ६ ए। शिमीवतो भामिनोदुर्ह्णा २३ यून्। आसन्नेषा मप्सुवाहो मयो २३ भून्। यएषांभृत्यामृणधत्सजायिवा ३ उवा ३। ऊ ३४ पा ॥१॥

रम्यं सुशोभनं दिव्यं सर्व सौख्य करं शुभम् ॥
आसनञ्च मयादत्तं गृहाण परमेश्वर ॥

श्री विष्णुपंचायतन देवताभ्यो नमः आसनं समर्पयामि ॥ ततः अञ्जलिं वध्वा विष्णुपंचायतन देवताः स्वागतम्? सुस्वागतम् इत्युक्त्वा

पाद्यम्

ओं पदन्देवस्य मीढुषोऽनाधृष्टाभि रुतिभिः ॥ भद्रासूर्य इवोपदृक् ॥१॥

पदन्देवा औहोहायि। स्यामा २इ ढ्ढ २३४ पाः। अनाधा २३४ ४ । औहोवा।इहा २३४ हायि। उहूवा २३४ भीः।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भद्रासू । र्याइवोपा ३४ । औहोवा । इहा २३४ हायि । औहो ३१२३४ दक् । एहिया ६ हा । हो ५ इ । डा ॥१॥

उष्णोदकं निर्मलंच सर्वसौगन्ध्य संयुतम् ॥
पाद प्रक्षालनार्थाय दत्तंते प्रतिगृह्यताम् ॥
एतत्पाद्यं ओंश्री विष्णुपंचायतन देवताभ्यो नमः ॥

अर्घ्यम्

ओं आघाये अग्निमिन्धते स्तृणन्ति वर्हिरानुषक् ॥ येषामिन्द्रो युवा सखा ॥१॥

आघाये अग्निमिन्धाताइ । स्तृणन्ति वर्हिरानुषाक् । येषामिन्द्रो-युवाइहा । ऊवाइ । ऊवो २३४वा सा ५ खो ६ हायि ॥१॥

अर्घ्यंगृहाण देवेशगन्ध पुष्पाक्षतैः सह ॥
करुणाकरमे देव गृहाणार्घ्यं नमोस्तुते ॥
इदमर्घ्यं ओं श्री विष्णुपञ्चायतन देवताभ्यो नमः ॥

आचमनीयम् ॥

सर्वतीर्थ समायुक्तं सुगन्धि निर्मलं जलम् ॥
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ॥
इदमाचमनीयं ओं श्रीविष्णु पंचायतन देवताभ्यो नमः ॥

स्नानीयम् ॥

ओंसमन्न्यान्त्युपयन्त्यापः समान मूर्वन्नद्यः स्पृणन्ति ॥ तमूशुचिं शुचयोदीदिवा ँ समपान्नपात मुपयन्त्यापः ॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हाउ ।३। ऐरयत् ।३। अपः समैरयत ।३। भूत मैरयत् ।३। अपां गर्भोग्निरिड़ा पांगर्भोग्निरिड़ा ।२। पृथिव्या गर्भोग्नि रिड़ा ।३। समन्न्यायन्त्युपयन्तिया २३ न्याः समान मूर्वन्नद्य स्पृणा २३ न्ती। तमूशुचिं ँ शुचयो दीदिवा २३ ँसाम् । अपान्नपात मुपयन्तिया२३ पा ३ः । हाउ ।३। ऐरयत् ।३। अपः समैरयत ।३। भूत मैरयत्।३। अपा ँ गर्भोग्नि रिड़ा । पा ँ गर्भोग्नि रिड़ा ।२। पृथिव्या गर्भोग्निरिड़ा ।२। पृथिव्या गर्भोग्नि रिड़ा ३। हाउवा ।ए। अग्निः शिशुः क्कः । ए। शुक्रः शिशुक्कः ।ए। तेजः शक्रस्यशक्रम् ।ए। तेजः सप्राः समीची; । ए । तेज उषोनजारः । ए । सुवर्ज्योती २३४५ः ॥१॥

गंगासरस्वती रेवा पयोष्णी नर्मदा जलैः ॥
स्नापितोसि मयादेव तथा शान्ति कुरुष्वमे ॥

इदं स्नानीयं ओं श्री विष्णु पंचायतन देवताभ्यो नमः । पञ्चामृत स्नाने विशेषः ॥

तत्रादौपयः स्नानम्

ओं चक्रंयदस्यप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छ्यात् ॥
पृथिव्या मतिषितंयदूधः पयोगोष्वदधाओषधीषु ॥ १ ॥

चक्रंयदस्याप्सुवानिषत्ताम् । उतोतदस्मैमध्विच्चछा २३ द्यात् । पृथिव्यामतिषितंयदू २३ धाः । पयोगो २३ षु । आदधाओषधीषु । इडा २३ भा ३४३ । ओ २३४५ इ । डा ॥१॥

कामधेनु समुत्पन्नं सर्वेषां जीवनं परम् ॥
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदं स्नानीयंपयः ओं श्रीविष्णु पञ्चायतन देवताभ्योनमः ॥
शुद्धोदकस्नानीयं ओं श्रीविष्णु पंचायतन देवताभ्योनमः ॥
स्नानांग माचमनीयं ओंश्रीविष्णु पंचायतन देवताभ्यो नमः

दधिस्नानम् ॥

ओं दधिक्राव्णो अकारिषं जिष्णो रश्वस्य वाजिनः ॥
सुरभिनो मुखाकरत्प्रण आयू ँ षि तारिषत् ॥२॥

ओहाइ । दधिक्राव्णो अकारिषाम् । ओहाइ । ओहाइ । जिष्णोरश्वस्य वाजिना २३ होइ । सुरभिनो मुखाका २३ रात् । प्रना २३ होइ आयू २३ हो । षितारा २३ षा ३४३ त् । ओ २३४५ इ । डा । ॥१॥

पयसस्तु समुद्भुतंमधुराम्लं शशिप्रभम् ॥
दध्यानीतं मयादेव स्नानार्थं प्रतिगृह्यताम् ॥
इदं स्नानीयं दधि ओं श्रीविष्णु पंचायतन देवताभ्योनमः ॥
शुद्धोदक प्रस्नानीयं ओं श्रीविष्णु०
स्नानाङ्गमाचमनीयं ओं श्रीविष्णु०

घृतस्नानम् ॥

ओं घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ॥
द्यावापृथिवी वरुणस्य धर्म्मणा विष्कभितेअजरे भूरिरेतसा ॥१॥

घृतव । ताइभुवनानाम् । अभिश्रिया । उर्वी पृथ्वी मधुदुघे सुपेशसा २३ । होइ । द्यावापृथिवीवरुणा । स्याधर्म्मणा २३ । हाइ । विष्काइमा २३ इते । आजरे । भूरि । राये ३। तसाउवा ३। ए ३। इन्दुः समुद्र मुर्व्विया विभाती २३४५ ॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नवनीत समुत्पन्नं सर्वसन्तोष कारकम् ॥
घृतंतुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥
इदं स्नानीयं घृतं ओं श्री विष्णुपञ्चायतन देवताभ्यो नमः ॥
शुद्धोदक स्नानं ओं विष्णु पञ्चा०
स्नानाङ्गमाचमनीयम् ओं श्री विष्णु पञ्चा०

मधुस्नानम् ॥

ओं सपूर्व्योमहोनांवेनः क्रतुभिरानजे
यस्यद्वारामनुः पितादेवेषुधिय आनजे ॥१॥

सपूर्व्योमहोना ६ मे । वेनः क्रतू ३ भाइरानजे ३ । हा ३ हा । औ ३ हो ३ वा । आइही २। यस्यद्वारा ३ मानुः पिता ३। हा ३ हा । औ ३ हो३वा । आइही २ । यआ २३। ना २ जा २३४ औहोवा । मधुश्चूना २३४५: ॥१॥

तरुपुष्प समुद्भूतं सुस्वादु मधुरंमधु ॥
तेजःपुष्टिकरंदिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

इदं स्नानीयं मधु ओं श्री विष्णुपञ्चायतन देवताभ्यो नमः ॥
शुद्धोदकस्नानं ओं श्रीविष्णु०
स्नानांग माचमनीयं ओं श्रीविष्णु०

शर्करास्नानम् ॥

ओं रसन्ते मित्रो अर्यमा पिवन्तुवरुणः कवे ॥
पवमानस्य मरुतः ॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रसन्तेमाइ । त्रोअर्यमा । पिवन्तू वा २। रुणक्वाइ । पवमाना २ । स्यम । रुता २३४ औहोवा । इषोवृधे १ ॥ १ ॥

इक्षुसार समुद्भूता शर्करापुष्टिकारिका ॥
मलापहारिकादिव्या स्नानार्थंप्रतिगृह्यताम् ॥

एषा स्नानीया शर्करा ओं श्रीविष्णुपंञ्चायतन देवताभ्यो नमः ॥
एतच्छुद्धोदकस्नानं ओं श्री विष्णु०
इदं स्नानांगमाचनीयं ओं श्री विष्णु०
पञ्चामृतस्नानांगं तुलसीदलं ओं श्री विष्णु०

अथ विष्णुसंहितया अभिषिंचेत् ॥

ओं इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम् ॥ समूढ़मस्या पा ँ सुले ॥ १ ॥

इदा ६ मे । विष्णू २ः । विचक्रा २३४ मायि । त्रायिधानि । दधा-यिपा १ दा २ म् । समू २ हो १। ढा २३ मा ३। स्या २ पा २३४ औहोवा । ए ३ । सूले १ ॥ १ ॥

प्रक्षस्यवृष्णो अरुषस्य नूमहः
प्रनोवचो विदथा जातवेदसे ।
वैश्वानराय मतिर्नव्यसेशुचिः
सोमइव पवते चारुरग्नये ॥ २ ॥

हाउ । ३ । ऊ २ । ३ । वा ३ । हाउवा ३ । हस् ह हस् । अर्चिः शोचिस्तपोहरः । प्रक्षस्य वृष्णो अरुषस्यनूमा २३ हाः । प्रनोवचो

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विदथा जातवेदा २३ साइ। वैश्वानराय मतिर्नव्यसेशू २३ चीः। सोमइव पवते चारुरग्ना २३ या ३ यि। हाउ।३। ऊ २।३। वा ३। हाउवा ३। ई २३४५ ॥२॥

प्रकाव्यमुशने वव्रुवाणाः
देवोदेवानां जनिमा विवक्ति ॥
महिव्रतः शुचिवन्धुः पावकः
पदावराहो अभ्येतिरेभन् ॥३॥

हाउहाउहुप्। प्रकावियाम्। उशने। वव्रुवाणाः। देवोदेवा। ना३ञ्जनि। माविवक्ति। महिव्रताः। शुचिवा ३। धूःप वाकाः। हाउहाउ हुप्। पदावरा। हो ३ अभि। आ ३४३ यि। ती ३ रा ५ यिभा ६५६ न् ॥३॥

सहस्र शीर्षा. पुरुषः सहस्राक्षः सहस्रपात् ॥
सभूमिं ँ सर्वतो वृत्वात्यतिष्ठद्दशांगुलम् ॥४॥

उहुवाहाउ।३। सहस्रशीर्षाः पुरु २३ षाः। सहस्राक्षः सहस्रा २३ पात्। सभूमिं ँ सर्वतोवा २३ त्वां। अत्यतिष्ठद्दशाङ्गु २३ लाम्। उहुवाहाउ।२। उहूवा ३ हाउ। वा ३। इट् इड़ा २३४५ ॥४॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ॥
ष्यतथावि ँ व्यक्रामत्साशनानशने अभि ॥५॥

उहुवौहोवा २। ३। त्रिपादूर्ध्व उदैत्पुरु २३ षाः। पादोस्येहा भवत्पू २३ नाः। तथा विष्वङ्व्यक्रा २३ मात्। अशनानशनेआ २३ भी उहुवोहोवा २।२। उहुवौ। हो २। वा २३४। औहोवा। ई २३४ ड़ा।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उहुवौहोवा २।२। उहुवौ । हो २ । वा २३४ । औहोवा । सू २३४ वाः । उहुवौहोवा २।२। उहुवौ । हो २। वा २३४। औहोवा । ऊ २३४५ ॥५॥

पुरुष एवेदꣳ सर्वं यद्भूतंयच्च भाव्यम् ॥
पादोस्य सर्वाभूतानि त्रिपादस्यास्मृतन्दिवि ॥६॥

इयौहोवा २।३। पुरुषएवेदं ꣳ सा २३ र्वाम् । यद्भूतंयच्चभावा २३ याम् । पादोस्यसर्वाभूता २३नी । त्रिपादस्यामृतन्दा २४ इवी । इयौ-होवा २।२। इयौ । हो २। वा २३४ । औहोवा । ई २३४ डा । इयौ-होवा २।२। इयौ । हो २। वा २३४ । औहोवा । ज्यो २३४ तीः । इयौ होवा २। इयौ । हो २। वा २३४ । औहोवा । ई २३४५ ॥६॥

तावानस्य महिमा ततोज्यायां ꣳ श्चपुरुषः ।
उतामृतत्व स्येशानो यदन्नेनातिरोहति ॥७॥

हाउ । ३ । तावानस्य । महा २३ यिमा ३ । हाउ । ३ । ततो ज्यायांꣳश्चपुरु २३ षा ३ः । हाउ । ३ ।उतामृतत्त्वस्येशां २३ ना ३ः । हाउ । ३ । यदन्नेनातिरोहा २३ ती ३ । हाउ३वा ३ । इट् इड़ो २३४५ ॥७॥

ततो विराडजायत विराजो अधि पूरुषः ॥
सजातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः ॥८॥

हाउ ३ वा । ततोविराड़जायत । हाउ३ वा । विराजो अधि पुरुषः हाउ ३ वा । सजातोअत्यरिच्यत । हाउ ३ वा । पश्चाद्भूमि मथोपुरः । हाउ ३ वा ३ । ई २३४५ ॥८॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कयानश्चित्र आभुवदूती सदावृधः सखा
कयाशचिष्ठयावृता ॥६॥

उहा । ३ । अस्मीनस्मिन् । ३ । नृम्णाइ नृम्णम् ! ३ । निधाइ-माहे । ३ कयानश्चिन्त्रा ३ आभू १ वा २ त् । ऊतीसदावृ ३ धाः सा १ खा २। कयाशचिष्ठा ३ या वा १ र्त्ता २३ । हाउ ।३ । अस्मीनस्मिन् ।३। नृम्णाइ नृम्णम् ।३। निधाइ माहे ।२। निधा २३ यि । मा २ । हा २३४ । औहोवा । सुवर्ज्योती २३४५ ॥५॥

इदं विष्णुः प्रक्षस्यवृष्णः प्रकाव्य मुशनेवब्रुवाण इतिवाराह मन्त्यं पुरुषव्रतं चैषावैष्णवो नाम संहितैतां प्रयुञ्जन् विष्णुं प्रीणाति ॥

ओं भूर्भुवः स्वः श्रीविष्णु पंचायतन देवताभ्यो नमः अभिषिञ्चामि ॥ इदं आचमनीयं ओं श्रीविष्णु पञ्चायतन देवताभ्यो नमः ओं ऋग्वेदाय स्वाहा । ओं यजुर्वेदाय स्वाहा । ओं सामवेदायस्वाहा । ओं अथर्वणे नमः ॥ ततो वस्त्रेण देवताः प्रमृज्य जलं संशोष्य स्वस्थानेसंस्थाप्य ।

वस्त्रोपवस्त्रम् ॥

ओं अभिवस्त्रा सुवसनान्यर्षाभिधेनुः सुदुघाः पूयमानाः । अभि चन्द्रा भर्त्तवेनो हिरण्या भ्यश्वान् रथिनो देव सोम ॥१॥

अभिवस्त्रा । सुवस । नानियर्षा । अभिधेनूः । सुदुघाः । पूयमानाः । अभिचन्द्रा । भर्त्तवे । नोहिरण्याः । अभियश्वान् । रथिनः । दा ३४३ यि । वा ३ सो ५ मा ६५६ ॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वभूषाधिके सौम्येलोकलज्जानिवारणे ॥
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥
एते वस्त्रोपवस्त्रे ओं श्रीविष्णु पंचायतन देवताभ्यो नमः ॥
वस्त्रांगमाचमनीयं ओं श्रीविष्णु पंचायतन देवताभ्यो नमः ॥

यज्ञोपवीतम् ॥

ब्रह्मजज्ञानं प्रथमम्पुरस्तात्
विसीमतः सुरुचो वेनआवः ॥
सवुध्न्या उपमा अस्य विष्ठाः
सतश्चयोनि मसतश्च विवः ॥१॥

ब्रह्मा । ब्रा २३ ह्मा । जज्ञानम्प्रथमंपुरास्तात् । विसी । वा २३ यिसी । मतःसुरुचोवेनआवः । सवू । सा २३ वु । ध्नियाउपमाअस्य वायिष्ठाः । सताः । सा २३ ताः । चयोनिमसतश्चवायिवा २३४३ः । ओ २३४५ यि । डा ॥१॥

तवभिस्तन्तुभिर्युक्तन्त्रिगुणन्देवतामयम् ॥
उपवीतंचोत्तरीयं गृहाण परमेश्वर ॥
इदं यज्ञोपवीतम् ओं श्रीविष्णु पंचायतन देवताभ्यो नमः ।

गन्धम् ॥

ओं गायन्तित्वा गायत्रिणोर्चन्त्यर्क मर्किणः ॥
ब्रह्माणस्त्वा शतक्रत उद्वंशमिवयेमिरे ।

गाया ३१ । तित्वा ३१२३४ । गाय । त्रा ३ यिणाः । अर्चा ३१ । तिया ३१२३४ । कम । का ३ यिणाः । ब्रह्मा ३१ । णस्त्वा ३१२३४ ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शत । क्रा ३ ताउ । उद्वा ३१ । शमा ३१२३४ यि । वया ५ यि मिरायि । हो ५ यि । डा ॥१॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
एष गन्धः ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥

अक्षताः (विष्णवेतु यवाक्षताः) ॥

ओं अक्षन्नमीमदन्त ह्यवप्रिया अधूषत ॥ अस्तोषतस्वभानवो विप्रा नविष्ठया मती योजान्विन्द्रतेहरी ॥१॥

अक्षन्नमीमद । तही ३ । आ २३४ । वप्रिया अधू । षता । अस्तोषत स्वभानवः विप्राना २३ वी । ष्ठायामती । योजानू ३ वा ३ यि । द्रा २ ता २३४ औहोवा । हा २३४ री ॥१॥

अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ॥
मयानिवेदिता भक्त्यागृहाण परमेश्वर ॥
एतेऽक्षताः (विष्णवेयवाक्षताः) ओं श्रीविष्णु पंचायतन देवताभ्यो-नमः ॥

पुष्पाणि ॥

ओं पवित्रन्ते विततम्ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ॥
अतप्ततनूर्नतदामो अश्नुते शृतास इद्वहन्तः सन्तदाशत ॥१॥
पवित्रन्ते विततम्ब्रह्मणस्पते ३ । हुवे २३ । २ । होवा ३ हा ३ । हायि । प्रभुर्गात्राणि परियेषि विश्वता २३ः । हुवे २३ । २ । होवा ३ हा

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

३ । हायि । अतप्ततनूर्नत दा २ मो अश्नुते ३ । हुवे २३ । २ । होवा ३ हा ३ । हायि । श्रृतासइद्वहन्तः सन्तदा २ शत । हुवे २३ । २ । होवा ३ हा ३ । हा ३४ । औहोवा । अर्कोदेवाना २ म्परमेवियो २ मा २३४ न् ॥१॥

अर्कपुष्पं भवत्यन्नं वै देवा अर्क इतिवदन्ति रसमस्य पुष्पमिति रसमेवान्नाद्य मवरुन्धेर्कपुष्पेण तुष्टुवानः ॥

माल्यादीनि सुगन्धीनि मालत्यादीनिवै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥
इमानिपुष्पाणि ओं श्री विष्णु पञ्चायतन देवताभ्योनमः ॥

तुलसीदलम् ॥

ओंसहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमिꣳ सर्वतोवृत्वात्यतिष्ठ द्दशाङ्गुलम् ॥१॥

उहुवा हाउ । ३ । सहस्रशीर्षाः पुरु २३ षाः । सहस्राक्षः सहस्रा २३ पात् । सभूमिꣳ सर्वतोवा २३ त्वा । अत्यतिष्ठद्दशाङ्गु २३ लाम् । उहुवा हाउ । २ । उहूवा ३ हाउ । वा ३ । इट् इडा २३४ ॥१॥

तुलसींहेमरुपांच रत्नरुपाञ्च मञ्जरीम् ॥
भवमोक्षप्रदान्तुभ्य मर्पयामि हरिप्रियाम् ॥
इदन्तुलसीदलं ओं श्री विष्णु पंचायतन देवताभ्योनमः ॥

धूपः ॥

ओं त्वेपस्ते धूम ऋण्वति दिविसन्छुक्र आततः ॥
सूरोनही द्युतात्वं कृपा पावक रोचसे ॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वेषास्ते २३ धूमऋण्वति हाउ। दिविसञ्छुक्रा ३ आताता ३:। सूरोनही हाउ। द्युतातु वा ३ म्। कृपापवा हाउ। करोचा २३ सा २४३ यि। ओ २३४५ यि। डा ॥१॥

वनस्पति रसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ॥
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥
एष धूपः ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥

दीपः ॥

ओं पवमानो अजीजन दिवश्चित्र न्नतन्यतुम् ॥
ज्योति र्वैश्वानरं वृहत् ॥१॥

पावा। मानो। अजीजा २३४ नात्। दिवश्चित्राम्। नतन्यतुम्। ज्योतिर्वैश्वा २३। ना २ रा २३४ औहोवा। वृ २३४ हात ॥१॥

आज्यञ्च वर्त्ति संयुक्तं वह्निना योजितम्मया ॥
दीपं गृहाण देवेश त्रैलोक्य तिमिरापह ॥
एष दीपः ओं श्री विष्णु पंचायतन देवताभ्योनमः ॥

नैवेद्यम् ॥

ओं यद्वर्चो हिरण्यस्य यद्वावर्चो गवामुत ॥
सत्यस्य ब्रह्मणो वर्च स्तेनमा सꣳसृजामसि ॥

हाउ। ३। अहमन्नम्। ३। अहमन्नादो। हमन्नादो। २। हं विधारयो। २। हं विधारयः। हाउ। ३। यद्वर्चो हिरण्य। स्या। यद्वावर्चो गवामु। ता। सत्यस्य ब्रह्मणोव। चाः। तेनमा सꣳसृजाम।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सायि । हाउ । ३ । अहमन्नम् । ३ । अहमन्नादो । हमन्नादो । २ । हम्बि धारयो । २ । हम्बिधारयः । हाउ ३ वा । ए । अहमन्न महमन्नादो हम्बिधारयः । ३ । ए । अहꣳ सुवर्ज्योती २३४५ः ॥१॥

शर्करा घृत संयुक्तं मधुरं स्वादु चोत्तमम् ॥
उपहार समायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

एतत्सोपहार नैवेद्यं ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥ ओं प्राणाय स्वाहा । ओं अपानाय स्वाहा । ओं व्यानाय स्वाहा । ओं उदानाय स्वाहा । ओं समानाय स्वाहा ॥ इति मन्त्रैः प्राणादि मुद्रां प्रदर्श्य, मध्ये मध्ये पानीयं उत्तरापोशनं हस्त प्रक्षालनीयं आचमनीयं च ओं श्रीविष्णुपंचायतन देवताभ्यो नमः ॥ इदं पूगीफल ताम्बूलम् ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥

फलम् ॥

ओं इन्द्रन्नरो नेमधिता हवन्ते
यत्पार्या यूनजते धियस्ताः ॥
शूरोनृषा ताश्रवसश्चकाम-
आगोमति व्रजे भजात्वन्नः ॥

हाउ । ३ । फाल् फल् फल् फल् फल् फल् । हाउ । ३ । इन्द्रन्नरो नेमधि ताहवा २ न्ताइ । यत्पार्यायुनज तेधिया २ स्ताः । शूरोनृषाताश्रवसश्चका २ माइ । आगोमतिव्रजेभजातूवा २ न्नाः । हाउ । ३ । फाल् फल् फल् फल् फल् फल् । हाउ ३ वा । मनः सुवरिड़ा २३४५ ॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदं फलं मयादेव स्थापितं पुरतस्तव ॥
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

एतानि फलानि ओं श्री विष्णु पंचायतन देवताभ्यो नमः ।

दक्षिणा ॥

ओं देवोवो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ॥
उद्वासिंचध्व मुपवा पृणुध्व मादिद्वो देव ओहते ॥१॥

देवो ३ वो ३ द्रविणोदाः । पूर्णांविवष्ट्वासिचम् । उद्वा १ सिञ्चा २ । ध्वमुपवापृणध्वम् । आदिद्वोदे २ । व ओहते इड़ा २३ भा ३४३ । ओ २३४५ यि । डा ॥१॥

हिरण्य गर्भ गर्भस्थं हेमवीजं विभावसोः ॥
अनन्त पुण्य फलद मतः शान्ति प्रयच्छमे ॥
एषा दक्षिणा ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥

आरात्तिक्यम् ॥

उद्यंलोकानरोचयः । होयि । इमांलोकान रोचयः । होयि । प्रजा भूत मरोचयः । होयि । विश्वम्भूतम रोचयः । हो २ । हा २३ ४ औहोवा । घर्म्मो ज्योती २३४५ः ॥१॥

कदलीगर्भ सम्भूतं कर्पूरञ्च प्रदीपितम् ।
आरार्त्तिक्य महं कुर्वे पश्यमे वरदोभव ॥

इदं कर्पूरारार्त्तिक्यं ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रदक्षिणा ॥

ओं परिकोशं मधुश्चुत ँ सोमः पुनानो अर्षति ॥ अभिवाणी ऋँषीणा ँ सप्तानूषत ॥

परिको ३ शम्मधुश्चुताम् । सोमः पुनाना अर्षति । होये ३ । अभिवा २३४५ । णीऋँषीना ँ स । प्तानाओ २३४ वा । षा २३४ ता ॥१॥

यानि कानि च पापानि जन्मान्तर कृतानि च ॥
तानि सर्वाणि नश्यन्ति प्रदक्षिण पदे पदे ॥

एष प्रदक्षिणीकारः ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥

मन्त्र पुष्पाञ्जलिः ॥

पाती २ः । ३ । दिवआ । पाती २ः । ३ । अन्तरिक्ष । स्या । पाती २ः । ३ । पार्थिव । स्या । पाती २ः । ३ । अपामोषधी । नाम् । पाती २ः । ३ । विश्वस्यभूत । स्या । पाती २ः । पाती २३ः । पा २ ता २३४ औहोवा । ए । पतिर्द्दिवः । ए । पतिरन्तरिक्षस्य । ए । पतिः पार्थिवस्य । ए । पति रपामोषधीनाम् । ए । पति र्विश्वस्य भूतस्य । ए । सुवर्ज्योती २३४५ः ॥१॥

एष मन्त्र पुष्पाञ्जलिः ओं श्री विष्णु पंचायतन देवताभ्यो नमः ।

नमस्कारः ॥

ओं नमोन्नाय नमोन्नपतय एकाक्षाय चावपन्नादाय च नमो नमः । रुद्रायतीर सदे नमः स्थिरायस्थिरधन्वने नमः प्रतिपदाय च

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पटरिणे च नम स्त्रियम्बकाय च क। पर्द्दिने च नम आश्रायेभ्यश्च प्रत्याश्रायेभ्यश्च नमः क्रव्येभ्यश्च विरिम्फेभ्यश्च नमः संवृते च विवृते च। अवज्यामिव धन्न्वनो विते मन्न्युन्न यामसि मृड़तान्न इह अस्मभ्यम्। इडा २३ भा। यइदम्विश्वम्भूतम्। युयो ३। आउ। वा २३। ना २३४ माः ॥१॥

नमोस्त्वनंताय सहस्रमूर्त्तये
सहस्र पादाक्षि शिरोरुवाहवे ॥
सहस्र नाम्ने पुरुषाय शाश्वते
सहस्र कोटी युग धारिणे नमः ॥

एष नमस्कारः श्री विष्णु पंचायतन देवताभ्यो नमः ॥

पार्षद पूजा ॥

विष्वक्सेनोद्धवाक्रूराः सनकाद्या शुकादयः ॥
महाविष्णु प्रसादन्ते सर्वे गृह्णन्तु वैष्णवाः ॥
रमात्रह्मादयोदेवाः सनकाद्या शुकादयः ॥
नारायण प्रसादंवै सर्वे गृह्णन्तु वैष्णवाः ॥

ओं श्री विष्णु पार्षदेभ्यो नमः इति गन्धाक्षत पुष्प धूप दीपनैवेद्यैः सम्पूज्य नमस्कृत्य शङ्खेन विशेषार्घ्यं फल सहितं दद्यात् ॥

ओं रक्षरक्ष महाविष्णो रक्ष त्रैलोक्य रक्षक ॥
भक्ताना मभयं कर्त्ता त्राता भव भवार्णवात् ॥
वरदत्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥
अनेन सफलार्घ्येण फलदोस्तु सदा मम ॥

एष विशेषार्घ्यः ओं श्री विष्णु पंचायतन देवताभ्यो नमः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रार्थना क्षमापनञ्च ।

आवाहनं नजानामि नजानामि विसर्जनम् ॥
पूजां चैव नजानामि क्षमस्व परमेश्वर ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥
तस्मात्कारुण्य भावेन रक्षमां परमेश्वर ॥
गतं पापं गतं दुःखं गतं दारिद्र्य मेव च ॥
आगता सुख संपत्तिः पुण्याच्च तव दर्शनात् ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥
यत्पूजितं मयादेव परिपूर्णं तदस्तुमे ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥
न्यूनं सम्पूर्णतां याति सद्योवन्देतमच्युतम् ॥

ओं अच्युताय नमः ॥३॥

अनेन विष्णु पंचायतन देवता पूजनेन विष्णु पंचायतन देवताः प्रीयन्ताम् ॥ ओं तत्सत् ॥३॥

अनेनैव क्रमेण अन्ये पञ्चायतनाः सम्पूज्याः ॥ तेषां विशेषः परिशिष्टे द्रष्टव्यः ॥

इति देव पूजा ।

अथ मध्याह्न स्नान विधिः ॥

वस्त्रादिकं मृत्तिकां कुशं गोमयं तिला नक्षतांश्च गृहीत्वा नदीतीरे जलाशये वा गत्वा तत्तीरं जलेन प्रक्षाल्य तत्र संस्थाप्य परकीय जलाशयश्चे जलमध्यात्पञ्च मृत्पिण्डानुद्धृत्य वहिः क्षिपेत् । ततो वक्ष्यमाण मन्त्रेण तीर्थं नमस्कुर्यात् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं कुरुक्षेत्रं गया गङ्गा प्रभास पुष्कराणि च ॥
तीर्थान्येतानि पुण्यानि स्नानकाले भवन्त्विह ॥
पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥
आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥
त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता ॥
याचितं देहिमे तीर्थं सर्व पापैः प्रमोचय ॥
अपामधिपतिस्त्वं च तीर्थेषु वसति स्तव ॥
वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छमे ॥
गंगे च यमुने चैव गोदावरि सरस्वति ॥
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

पावकान इत्यस्य मधुच्छन्दाऋषिर्गायत्रीछन्दः सरस्वती देवता तीर्थ नंतौ विनियोगः ॥

ओं पावकानः सरस्वती वाजेभिर्वाजिनीवती ॥ यज्ञं वष्टु धियावसुः ॥१॥

इति तीर्थं नमस्कृत्य—मृद्भिर्जलेनपादादि गात्राणि प्रक्षालयेत् ॥ वामपाणिना पादौ लिङ्गं गुदं हस्तश्च संक्षाल्य दक्षिण पाणिना जठरं हृदयं वाहुं मस्तकं च संक्षाल्य तूष्णीं स्नात्वा तीरे उपविश्य वद्धशिखी यज्ञोपवीती कुशहस्तः संकल्पं कुर्यात्—

ओं विष्णु ३ र्नमः परमात्मने श्रीपुराण पुरुषोत्तमाय तत्सदत्रे-त्यादि देशकालौ संकीर्त्य अमुक गोत्रः अमुक राशिरमुक शर्म्माहं कृत कायिकवाचिक मानसिक सांसर्गिक ज्ञाताज्ञात सकल दुरित-क्षयाय श्रीपरमेश्वर प्रीत्यर्थं अमुक तीर्थे जलाशये वा मध्याह्न स्नान

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महं करिष्ये इति संकल्प्य दक्षिण हस्ते जलमादाय सप्तवारं सप्तव्याहृति सहित गायत्र्यानुमन्त्रितं कृत्वा तज्जलं पीत्वा आचामेत् ॥

ततस्तीर्थाभिमानिनीं वरुण देवतां ध्यात्वा वक्ष्यमाण मन्त्रै मृत्तिकां गृह्णीयात् ॥

आसां क्रमेण नारायण भरद्वाजवामदेवाऋषयः अनुष्टुब्जगत्यनुष्टुप् छन्दाᳬसि पुरुषो द्यावापृथिवी मृत्तिका च देवताः मृद्ग्रहणे विनियोगः ॥

ओं सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ॥
सभूमिᳬ सर्वतो वृत्वाऽत्यतिष्ठ द्दशांगुलम् ॥१॥
घृतवती भुवनाना मभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा । द्यावापृथिवी वरुणस्य धर्मणा विष्कभितेअजरे भूरिरेतसा ॥२॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ॥
मृत्तिके हरमे पापं यन्मया पूर्व सञ्चितम्
त्वया हृतेन पापेन सर्व पापैः प्रमुच्यते ॥३॥

ततो वक्ष्यमाण मन्त्रै मृत्तिकां सम्मृज्यात् ॥

इदं विष्णु रित्यादि षण्णां मेधातिथिर्ऋषिर्गायत्री छन्दो विष्णुर्देवता मृत्तिका समूहने विनियोगः ।

ओं इदं विष्णुर्विचक्रमे त्रेधा निदधेपदम् ॥ समूढ़ मस्य पाᳬसुले ॥१॥ त्रीणिपदा विचक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्म्माणि धारयन् ॥२॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥३॥ तद्विष्णोः परमम्पदᳬ सदा पश्यन्ति सूरयः ॥ दिवीव चक्षुराततम् ॥४॥ तद्विप्रासोविपन्यवोजागृवाᳬसः समिन्धते ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विष्णोर्यत्परमम्पदम् ॥ अतो देवा अवन्तुनो यतो विष्णु र्विचक्रमे ॥ पृथिव्या अधिसानवि ॥६॥

तत ऊर्ध्वौपाणी कृत्वा

उद्वयमित्यस्य प्रस्कण्व ऋषिः पंक्तिश्छन्दः सूर्योदेवता उदुत्तम-मित्यस्य शुनःशेफ ऋषिस्त्रिष्टुप् छन्दो वरुणो देवता सूर्यावेक्षणे विनियोगः ॥

ओं उद्वयन्तमसः परि ज्योतिः पश्यन्त उत्तरम् । स्वः पश्यन्त उत्तरम् ॥ देवन्देवत्रा सूर्य मगन्म ज्योतिरुत्तमम् ॥१॥

ओं उदुत्तमं वरुणपाशमस्म दवाधमं विमध्यम ँ श्रथाय ॥ अथादित्य व्रतेवयं तवानागसो अदितये स्याम ॥२॥

ततो वक्ष्यमाण मन्त्राभ्यां प्रातिलोम्येन शिरआद्यङ्गेषु मृत्तिका लेपनं कुर्यात् ॥ प्रथमं मस्तके ततः स्कन्धयोः पार्श्वयोः हृदये उदरे ऊरुद्वये पादद्वये च ॥

अनयो र्वामदेव प्रजापती ऋषी अनुष्टुप् त्रिष्टुप् छन्दसी पृथिवीन्द्रौ देवते अङ्गेषु मृत्तिका लेपने विनियोगः ॥

ओं उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके ब्रह्मदत्तासि काश्यपेनामि मन्त्रिता ॥१॥

ओं अमोसि प्राण तद्दतं ब्रवीम्यमाह्यसि सर्वं मनु प्रविष्टः ॥ समे जरां रोग मपमृज्य शरीरा दपाम एधि मामृथानइन्द्र ॥२॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुनः सहस्र शीर्षेत्यादिभि मृत्तिकां गृहीत्वा मृत्तिका लेपनान्तं कृत्वा गोमयेन शिर आद्यङ्गेषु लेपनं कुर्यात् ॥

अस्य सौभरिर्ऋषिः ककुप् छन्दो मरुतो देवता गोमय लेपने विनियोगः ॥

ओं गावश्चिद्घास मन्यवः सजात्येन मरुतः सवन्धवः ॥ रिहते ककुभो मिथः ॥१॥

ततोङ्गुष्ठ तर्जनीभ्यां नासापुटंवद्ध्वा ऋतञ्चेति अघमर्षणं त्रिर्जपेत्॥

अस्य अघमर्षण ऋषिरनुष्टुप् छन्दो भाववृत्तो देवता प्राणायामे विनियोगः ॥

ओं ऋतञ्च सत्यञ्चाभीद्धात्तपसो अध्यजायत ॥
ततो रात्र्यजायततः समुद्रो अर्णवः ॥
समुद्रा दर्णवा दधि संवत्सरो अजायत ॥
अहो रात्राणि विदधद्विश्वस्य मिषतोवशी ॥
सूर्या चन्द्रमसौ धाता यथा पूर्वमकल्पयत् ॥
दिवञ्च पृथिवीं चान्तरिक्ष मथो स्वः ॥१॥

ततो वक्ष्यमाण मन्त्रै र्नाभिमात्र जलेस्थित्वा प्रत्यृचं ऋगन्ते कुशै र्मार्जनं कुर्यात् ॥

ओं शन्नोदेवीरित्यस्य सिन्धुद्वीपऋषि र्गायत्री छन्द आपो देवताः, आपोहिष्ठेति तिसृणांसिन्धुद्वीपऋषि र्गायत्री छन्दः आपो देवताः, उपास्मा इत्यादि तिसृणां असित कश्यपवैखानसा ऋषयो

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गायत्री छन्दः सोमो देवता तरत्समन्दी त्यवत्सारऋषि र्गायत्री छन्दः सोमो देवता एतोन्विन्द्र मितितिसृणां तिरश्चऋषिरनुष्टुप् छन्द इन्द्रो देवता नकिइन्द्रेति वामदेवऋषि र्गायत्री छन्दः सोमो देवता मार्जने विनियोगः ।

ओं शन्नोदेवी रभिष्टये शन्नो भवन्तु पीतये । शंयोरभि स्रवन्तुनः ॥१॥ आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥२॥ योवः शिवतमो रस स्तस्यभाजयतेह्नः ॥ उशतोरिव मातरः ॥३॥ तस्मा अरङ्ग मामवो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा चनः ॥४॥ उपास्मै गायतानरः पवमानायेन्दवे ॥ अभिदेवाँ इयक्षते ॥५॥ अभिते मधुना पयोथर्वाणो अशिश्रयुः ॥ देवन्देवाय देवयु ॥६॥ सनः पवस्व शंगवे शंजनाय शमर्वते ॥ शँराजन्नोषधीभ्यः ॥७॥ दविद्युतत्या रुचा परिष्ठोभन्त्या कृपा ॥ सोमाः शुक्रा गवाशिरः ॥८॥ हिन्वानो हेतृभिर्हित आवाजं वाज्य-क्रमीत् ॥ सीदन्तोवनुषो यथा ॥९॥ ऋधक्सोम स्वस्तये संजग्मानो दिवाकवे ॥ पवस्व सूर्योदृशे ॥१०॥ पवमानस्यते कवे वाजिन्त्सर्गा असृक्षत ॥ अर्वन्तोन श्रवस्यवः ॥११॥ अच्छाकोशं मधुश्चुत मुसृग्रं वारे अव्यये ॥ अवावशन्त धीतयः ॥१२॥ अच्छासमुद्रमिन्दवोस्तं गावो न धेनवः॥ अग्मन्नृतस्य योनिमा॥१३॥ तरत्सन्दीधावति धारा सुतस्यान्धसः ॥ तरत्समन्दीधावति ॥१५॥ ध्वस्त्रयोः पुरुषन्त्योरा सहस्राणि च दद्महे ॥ तरत्स मन्दी धावति ॥१६॥ आययो स्त्रिंशतन्तना सहस्राणि दद्महे ॥ तरत्समन्दी धावति ॥१७॥ एतो-न्विन्द्रँ स्तवाम शुद्धँ शुद्धेन साम्ना ॥ शुद्धैरुक्थैर्वावृध्वांसं शुद्धै

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

राशीर्वान्ममत्तु ॥१८॥ इन्द्रश्शुद्धोन आगहि शुद्धः शुद्धाभि रुतिभिः॥ शुद्धोरयिं निधारय शुद्धो ममद्धि सोम्य ॥१९॥ इन्द्रःशुद्धोहिनोरयिं शुद्धो रत्नानि दाशुषे ॥ शुद्धो बृत्राणि जिघ्नसे शुद्धोवाजꣳ सिषा-ससि ॥२०॥ तमुष्टवाम यं गिर इन्द्र मुक्थानि वावृधुः ॥ पुरुण्यस्य पौंस्या सिषासन्तोवनामहे ॥२१॥ नकि इन्द्रत्वदुत्तरं नज्यायो अस्ति वृत्रहन् ॥ नक्येवं यथात्वम् ॥२२॥ पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ॥ अतप्ततनूर्नतदामो अश्नुते शृतास इद्वहन्तः सन्त दाशत ॥२३॥ तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन् ॥ अवन्त्यस्यपवितार माशवो दिवःपृष्ठ मधिरोहन्ति तेजसा ॥२४॥ अरुरुचदुषसः पृश्नि रग्रिय मुक्षा मिमेति भुवनेषु वाजयुः ॥ मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भ मादधुः ॥२५॥ ओं भूः पुनातु ॥ ओं भुवः पुनातु ॥ ओं स्वः पुनातु ॥ ओं भूर्भुवः स्वः पुनातु ॥ इति मार्जयित्वा उक्तविधिना त्रीन् प्राणायामान् कृत्वा जले त्रिवारं निमज्ज्य निमग्न एव सहस्रशीर्षे ति त्र्यृचं पठेत् ॥

तिसृणां नारायणऋषि रनुष्टुप् छन्द. पुरुषो देवता अघमर्षणे विनियोगः ॥

ओं सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिꣳ सर्वतो-वृत्वाऽत्यतिष्ठद्दशांगुलम् ॥१॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहा भवत्पुनः ॥ तथा विष्वङ्व्यक्रामत्साशना नशने अभि ॥२॥ पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ॥ पादोस्य सर्वा भूतानि त्रिपादस्या मृतन्दिवि ॥३॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततस्त्रिः प्राणायामं कृत्वा तूष्णीं त्रिवार मवगाह्याचम्य पुनः शन्नोदेव्यादिभि र्मार्जनादीन कृत्वा प्रातः स्नानवत्स्नानांग तर्पणं करिष्ये इति संकल्प्य देवतीर्थेन ओं देवा स्तृप्यन्तु । देवपत्न्यस्तृप्यन्तु । देवपुत्रास्तृप्यन्तु । देवगणास्तृप्यन्तु । निवीती ऋषितीर्थेन ऋषयस्तृप्यन्तु । ऋषिपत्न्यस्तृप्यन्तु । ऋषिपुत्रास्तृप्यन्तु । ऋषिगणास्तृप्यन्तु । ततः प्राचीनावीती पितृतीर्थेन ओं पितरस्तृप्यन्तु । पितृपत्न्य स्तृप्यन्तु । पितृपुत्रास्तृप्यन्तु । पितृगणास्तृप्यन्तु । ओं आ ब्रह्मस्तम्ब पर्यन्तं जगत्तृप्यतु । इत्यन्तं तर्पणं कृत्वा आचम्य शुद्धे वाससो परिधाय मध्याह्न सन्ध्यां कुर्यात् ॥

अथ मध्याह्न सन्ध्या ॥

शुद्धं भस्म गृहीत्वा चन्दनेन सह लेपनार्हं विधाय,
यतः—प्रातः ससलिलं भस्म मध्याह्ने गन्ध मिश्रितम् ॥
सायाह्ने निर्जलं भस्म एवं भस्म विलेपयेत् ॥

ओं मानस्तोकइत्यस्य वसिष्ठऋषि र्जगती छन्द इन्द्रोदेवता भस्माभिमन्त्रणे विनियोगः ॥

ओं मानस्तोके तनये मान आयौ मानोगोषु मानोअश्वेषु रीरिषः ॥ वीरान्मानो रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥१॥ इत्यभिमन्त्र्य

ओं त्र्यायुष मित्यस्य प्रजापतिऋषि र्यजुः प्रजापति र्देवता भस्म लेपने विनियोगः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुष मगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम ॥१॥

इति ललाटे अंसयोः वाह्वोः ग्रीवायां हृदये पृष्ठेच त्रिपुण्ड्रं कृत्वा गायत्र्या शिखां वध्वा प्राङ्मुखः वामहस्त धृत कुशमुष्टि राचम्य विष्णु स्मरणं कुर्यात् ।

ओं तद्विष्णोः परमम्पदꣳ सदा पश्यन्ति सूरयः ॥ दिवीवचक्षु राततम् ॥ १ ॥ ओं अपवित्रः पवित्रोवा सर्वावस्थां गतोपिवा । यःस्मरेत्पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः ॥ ओं विष्णुः पुण्डरीकाक्षः पुनातु ॥१॥

ततः ओं विष्णुः ३ अद्येत्यादि देशकालौसंकीर्त्य अमुक गोत्रः अमुकराशिः अमुक शर्म्माहं आत्म संस्कार द्वारा अद्योपात्त सकल दुरितक्षयाय ब्रह्मलोकावाप्तये च मध्याह्न सन्ध्योपासन महं करिष्ये इति संकल्प्य ।

ओं पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनोपवेशने विनियोगः ॥

ओं पृथ्वित्वया धृता लोका देवित्वं विष्णुना धृता ॥ त्वञ्च धारय मां देवि पवित्रं कुरु चासनम् ॥

इत्यासन शुद्धिं कृत्वोविश्य मार्जनं कुर्यात् ।

ओं भूः पुनातु । ओं भुवः पुनातु । ओं स्वः पुनातु । ओं महः पुनातु । ओं जनः पुनातु । ओं तपः पुनातु । ओं सत्यम्पुनातु । ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियो यो नः प्रचोदयात् पुनातु ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

करन्यासः ॥ ओं भूः अंगुष्ठाभ्यांनमः । ओं भुवस्तर्जनीभ्यां नमः । ओंस्वः मध्यमाभ्यां नमः । ओं तत्सवितुर्वरेण्यं अनामिकाभ्यां नमः । ओं भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यां नमः । ओं धियो योनः प्रचोदयात् करतल करपृष्ठाभ्यां नमः ॥

अंगन्यासः ॥ ओं भूः हृदयाय नमः । ओ भुवः शिरसे स्वाहा । ओं स्वः शिखायै वषट् । ओं तत्सवितुर्वरेण्यं कवचाय हुम् । ओं भर्गो देवस्य धीमहि नेत्रत्रयायवौषट् । ओं धियोयोनः प्रचोदयात् अस्त्राय फट् ॥

ध्यानम् ॥

सावित्रीं युवतीं शुक्लां शुक्लवस्त्रां त्रिलोचनां ।
रुद्राणीं रुद्र दैवत्यां रुद्रलोक निवासिनीं ॥
यजुर्वेद कृतोत्संगांजटा मुकुट मण्डितां ॥
कैलास विहितावासांमायान्तीं सूर्य मण्डलात् ॥
आगच्छवरदे देवि त्र्यक्षरे ब्रह्म वादिनि ॥
गायत्रि च्छन्दसां मात र्ब्रह्मयोनि नमोस्तुते ॥
ततो जलेनात्मानं परिवेष्ट्य

ओंकारस्य ब्रह्माऋषि र्दैवी गायत्री छन्दोग्निर्देवता सर्व कर्म्मा रम्भे विनियोगः ॥ सप्त व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजात्रि गोतम वसिष्ठ कश्यपा ऋषयो गायत्र्युष्णिगनुष्टुब्बृहती पंक्ति त्रिष्टु-ब्जगत्यश्छन्दांस्यग्नि वाय्वादित्य वृहस्पति वरुणेन्द्र विश्वेदेवा देवताः, गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता, शिरसः प्रजापतिऋषिर्गायत्री छन्दो ब्रह्माग्नि वायुसूर्या देवताः प्राणायामे विनियोगः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियोयोनः प्रचोदयात् ओं आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवःस्वरोम् ॥

इति त्रीन् प्राणायामान् विधाय ।

ओं आपःपुनन्त्वित्यस्य नारायणऋषिरनुष्टुप्छन्द आपो देवता मन्त्राचमने विनियोगः ॥

ओं आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु माम् ॥
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् ॥
यदुच्छिष्ट मभोज्यञ्च यद्वादुश्चरितं मम ॥
सर्वम्पुनन्तु मामापोऽसताञ्च प्रतिग्रहꣳ स्वाहा ॥
इत्याचम्य यथाविधि द्विराचम्य मार्जनम् ॥

ओंकारस्य ब्रह्माऋषिर्दैवी गायत्री छन्दोऽग्निर्देवता, त्रिव्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजा-ऋषयः गायत्र्युष्णिगनुष्टुभ श्छन्दांस्यग्निवायुसूर्या देवताः, गायत्र्या विश्वामित्र ऋषि र्गायत्री छन्दः सविता देवता, आपोहिष्ठे ति तिसृणां सिन्धुद्वीप ऋषि र्गायत्री छन्द आपो देवता मार्जने विनियोगः ॥

ओम् ॥ भूर्भुवःस्वः ॥ ओं तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि। धियोयोनः प्रचोदयात् ॥ ओं आपो हिष्ठा मयोभुव स्तान ऊर्जे दधातन। महेरणाय चक्षसे ॥ योवः शिवतमो रसस्तस्य भा जयते हनः। उशतीरिव मातरः ॥ तस्मा अरंग मामवो यस्यक्षयाय जिन्वथ। आपो जनयथा चनः ॥

अघमर्षणम् ॥ ऋतञ्चेत्यादीना मघमर्षण ऋषि रनुष्टुप् छन्दो भाववृत्तो देवता अघमर्षणे विनियोगः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं ऋतञ्च सत्यञ्चाभीद्धा त्तपसो अध्यजायत ॥
ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥
समुद्रा दर्णवा दधि संवत्सरो अजायत ॥
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ॥
दिवञ्च पृथिवीञ्चान्तरिक्ष मथो स्वः ॥

इति हस्तस्थोदके नासिकामवधाय श्वासं त्यजन् मन्त्रं पठित्वा तस्मिन् सर्वं पापं गत मिति मत्त्वा, तज्जलं वहिः प्रक्षिप्य हस्तं प्रक्षाल्य गायत्र्या सूर्याय तिष्ठनसकृदर्घ्यं दद्यात् ॥ तत ऊर्ध्ववाहुर्वक्ष्यमाणमन्त्रै रादित्य मुपतिष्ठेत् ॥

ओं उदुत्यमित्यस्य प्रस्कण्व ऋषिर्गायत्री छन्दः सूर्योदेवता, चित्रमित्यस्य कौत्सऋषिस्त्रिष्टुप् छन्दः सूर्यो देवता, विभ्राडित्यस्य सूर्य ऋषिर्जगती छन्दः सूर्योदेवता आयं गौरिति तिसृणां सूर्यऋषि र्गायत्री छन्दः सूर्यो देवता, अपत्ये इत्यष्टर्चस्य प्रस्कण्व ऋषिर्गायत्री छन्दः सूर्यो देवता मध्याह्नोपस्थाने विनियोगः ॥

ओं उदुत्यञ्जातवेदसं देवम्वहन्ति केतवः॥ दृशे विश्वाय सूर्यम्॥१॥ चित्रन्देवाना मुदगादनीक ञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्राद्यावा पृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥२॥ विभ्राड् वृह-त्पिवतु सोम्यं म्मध्वायुर्दधद्यज्ञपता वविल्ह्रुतम् ॥ वात जूतो यो अभि रक्षतित्मना प्रजाःपिपर्त्ति बहुधा विराजति ॥३॥ आयङ्गौः पृश्निर-क्रमीदसदन्मातरपुरः ॥ पितरञ्च प्रयन्त्स्वः ॥४॥ अन्तश्चरति रोच-नास्य प्राणादपानती ॥ व्यख्य न्महिषो दिवम् ॥५॥ त्रिँशद्धाम

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विराजति वाक्पतंगाय धीयते ॥ प्रतिवस्तो रहद्युभिः ॥६॥ अपत्ये तायवो यथा नक्षत्राय न्त्यक्तुभिः ॥ सूराय विश्वचक्षसे ॥७॥ अदृश्र-ममस्य केतवो विरश्मयो जनाँ अनु ॥ भ्राजन्तो अग्नयो यथा ॥८॥ तरणिर्विश्व दर्शतो ज्योतिष्कृदसि सूर्य ॥ विश्वमाभासि रोचनम् ॥९॥ प्रत्यङ् देवानाम्विशः प्रत्यङङुदेषि मानुषान् ॥ प्रत्यङ् विश्वँ स्वर्दृशे ॥१०॥ येना पावक चक्षसा भुरण्यन्तञ्जनाँ अनु ॥ त्वम्व-रुण पश्यसि ॥११॥ उद्यामेषिरजः पृश्त्रहा मिमानो अक्तुभिः ॥ पश्यञ्जन्मानि सूर्य॥१२॥ अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः ॥ ताभिर्याति स्वयुक्तिभिः ॥१३॥ सप्त त्वा हरितो रथे वहन्ति देव सूर्य ॥ शोचिष्केशं विचक्षण ॥१४॥ इति सूर्य मुपस्थाय तर्पणं कुर्यात् यतः—

आप्लवने तु सम्प्राप्ते तर्पणं तदनन्तरम् ॥
गायत्रीञ्च जपेत्पश्चात्स्वाध्यायञ्चैव शक्तितः ॥
आप्लवने तु सम्प्राप्ते गायत्रीं जपतः पुरा ॥
तर्पणं कुर्वतः पश्चात्स्नानमेववृथाभवेत् ॥

संकल्पं कुर्यात् ओं विष्णु ३ रद्ये हेत्यादि देश कालौ संकीर्त्य श्री देवर्षि पितृलोक प्रीतये देवर्षि पितृ तर्पण महं करिष्ये ॥

ततः प्राङ् मुखो दक्षिणजानु भूमौ पातयित्वा शुक्ल तिल सहितैः कुशोदकैर्यज्ञोपवीती देवतीर्थेन सकृदञ्जलिना तर्पयेत् ॥ सर्वत्रादौ प्रणवोच्चारः ॥

ओं मोद स्तृप्यतु। ओं प्रमोद स्तृप्यतु। ओं षण्मुख स्तृप्यतु। ओं दुर्म्मुख स्तृप्यतु। ओं आधय स्तृप्यन्तु। ओं व्याधयस्तृप्य-

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पड़ेते विघ्न विनायकाः स्वस्ति कुर्वन्तु तर्पिताः स्वस्तिकुर्वन्तु तर्पिताः ॥

ततोऽञ्जलिं वध्वा ओं नमोब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमोवेदेभ्यो नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय चोपजायत ॥

ओं ओंकारो महाव्याहृतयो गायत्री ब्रह्मा देवा वेदा ऋषयः पितर श्छन्दाᳬस्याचार्या स्तृप्यन्ताम् ॥३॥ ओं अग्नि स्तृप्यतु। ओं प्रजापति स्तृप्यतु। ओं विश्वेदेवास्तृप्यन्तु। ओं ओंकार स्तृप्यतु ओं वषट्कार स्तृप्यतु ओं महाव्याहृतय स्तृप्यन्तु ओं गायत्री तृप्यतु ओं ब्रह्मातृप्यतु ओं विष्णुस्तृप्यतु ओं वेदा स्तृप्यन्तु ओं देवा स्तृप्यन्तु ओंऋषय स्तृप्यन्तु ओं मुनय स्तृप्यन्तु ओं आचार्या स्तृप्यन्तु ओं पुराणानि तृप्यन्तु ओं छन्दाᳬसि तृप्यन्तु ओं यज्ञास्तृप्यन्तु ओं अध्ययनं तृप्यतु ओं द्यावा पृथिव्यौ तृप्येताम् ओं अन्तरिक्षं तृप्यतु ओं अहोरात्राणि तृप्यन्तु ओं मासास्तृप्यन्तु ओं ऋतवस्तृप्यन्तु ओं संवत्सरस्तृप्यतु ओं वरुणस्तृप्यतु ओं समुद्रास्तृप्यन्तु ओं नद्य-स्तृप्यन्तु ओं गिरयस्तृप्यन्तु ओं क्षेत्राणि तृप्यन्तु ओं वनानि तृप्यन्तु ओं ओषधय स्तृप्यन्तु ओं वनस्पतय स्तृप्यन्तु ओं पशव स्तृप्यन्तु ओं नागास्तृप्यन्तु ओं उरगास्तृप्यन्तु ओं सुपर्णा स्तृप्यन्तु ओं वयाᳬसि तृप्यन्तु ओं गावस्तृप्यन्तु ओं वसवस्तृप्यन्तु ओं रुद्रास्तृप्यन्तु ओं आदित्यास्तृप्यन्तु ओं मरुत स्तृप्यन्तु ओं सिद्धा-स्तृप्यन्तु ओं साध्यास्तृप्यन्तु ओं गन्धर्वास्तृप्यन्तु ओं पिशाचा स्तृप्यन्तु ओं यक्षास्तृप्यन्तु ओं रक्षाᳬसि तृप्यन्तु ओं भूतानि

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तृप्यन्तु ओं नक्षत्राणि तृप्यन्तु ओं अश्विनौ तृप्येताम् ओं अप्सरस-स्तृप्यन्तु ओं चतुर्विध भूतग्राम स्तृप्यतु ओं मरीचि स्तृप्यतु ओं ओं अत्रिस्तृप्यन्तु ओं अंगिरास्तृप्यतु ओं पुलस्त्यस्तृप्यतु ओं पुलह स्तृप्यतु ओं क्रतुस्तृप्यतु ओं प्रचेतास्तृप्यतु ओं वसिष्ठ स्तृप्यतु ओं भृगुस्तृप्यतु ओं नारद स्तृप्यतु ओं सप्तर्षय स्तृप्यन्तु ओं अरुन्धती तृप्यतु ओं गोभिलाचार्य स्तृप्यतु ॥ कृताञ्जलिः, एते ब्रह्मादयो देवाः स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः ॥

ततः प्राचीनावीती पितृतीर्थेन दक्षिणं जानु भूमौ पातयित्वा द्विगुण कुशैः सकृष्ण तिलै स्त्रि स्त्रिस्तर्पयेत् ॥

ओं राणायनि स्तृप्यतु ॥३॥ ओं सात्यमुग्रिस्तृप्यतु ॥३॥ ओं व्यासस्तृप्यतु ॥३॥ ओं भागुरि स्तृप्यतु ॥३॥ ओं और्गुण्डि स्तृप्यतु ॥३॥ गौल्गुलवि स्तृप्यतु ॥३॥ ओं भानुमानौपमन्यव स्तृप्यतु ॥३॥ ओं कराटि स्तृप्यतु ॥३॥ ओं मशको गार्ग्य स्तृप्यतु ॥३॥ ओं वार्षगण्य स्तृप्यतु ॥३॥ ओं कौथुमि स्तृप्यतु ॥३॥ ओं शालिहोत्रि स्तृप्यतु ॥३॥ ओं जैमिनि स्तृप्यतु ॥३॥ त्रयोदशैते मे सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः ॥

ओं शठिस्तृप्यतु ॥३॥ ओं भाल्लवि स्तृप्यतु ॥३॥ ओं काल्लवि स्तृप्यतु ॥३॥ ओं ताण्ड्यस्तृप्यतु ॥३॥ ओं वृषाणक स्तृप्यतु ॥३॥ ओं रुरुकि स्तृप्यतु ॥३॥ ओं शमवाहु स्तृप्यतु ॥३॥ ओं अगस्त्य स्तृप्यतु ॥३॥ ओं वष्कशिरा स्तृप्यतु ॥३॥ ओं हूहू स्तृप्यतु ॥३॥ दशैते मे प्रवचन कर्त्तारः स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं कव्यवाल स्तृप्यतु ॥३॥ ओं नलस्तृप्यतु ॥३॥ ओं सोम स्तृप्यतु ॥३॥ ओं यमस्तृप्यतु ॥३॥ ओं अर्यमा तृप्यतु ॥३॥ ओं अग्निष्वात्तास्तृप्यन्तु ॥३॥ ओं सोमपीथा स्तृप्यन्तु ॥३॥ ओं वर्हिषद स्तृप्यन्तु ॥३॥ एते कव्यवालादयो दिव्याः पितरः स्वस्ति कुर्वन्तु तर्पिताः स्वस्तिः कुर्वन्तु तर्पिताः ॥

ओं यमस्तृप्यतु ॥३॥ ओं धर्मराज स्तृप्यतु ॥३॥ ओं मृत्यु स्तृप्यतु ॥३॥ ओं अन्तक स्तृप्यतु ॥३॥ ओं वैवस्वत स्तृप्यतु ॥३॥ ओं काल स्तृप्यतु ॥३॥ ओं सर्वभूतक्षय स्तृप्यतु ॥३॥ ओं औदुम्वरस्तृप्यतु ॥३॥ दध्न स्तृप्यतु ॥३॥ ओं नील स्तृप्यतु ॥३॥ ओं परमेष्ठी तृप्यतु ॥३॥ ओं वृकोदर स्तृप्यतु ॥३॥ ओं चित्र स्तृप्यतु ॥३॥ ओं चित्रगुप्तस्तृप्यतु ॥३॥ यमादयश्चतुर्दशेमे स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः ॥

ततः कृताञ्जलिः ओं आगच्छन्तु मे पितर इमंगृह्णन्त्वपोञ्जलिम् ॥ इति पितृनावाह्य ।

ओं अमुक गोत्रोस्मत्पिता अमुक देव शर्म्मा वसुस्वरूप स्तृप्यता मेतत्सतिलोदकं तस्मैस्वधा ॥३॥ ओं अमुक गोत्रोस्मत्पितामहः अमुक देवशर्म्मा रूद्रस्वरूप स्तृप्यता मेतत्सतिलोदकं तस्मै स्वधा॥३॥ ओं अमुक गोत्रोत्स्मत्प्रपितामहः अमुक देव शर्म्मा आदित्य स्वरूप स्तृप्यता मेतत्सतिलोदकं तस्मै स्वधा ॥३॥

ओं अमुक गोत्रास्मन्माता अमुको देवी वसु स्वरुपा तृप्यता मेतत्सतिलोदकं तस्यैस्वधा ॥३॥ ओं अमुक गोत्रास्मत्पितामही

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अमुकी देवी रुद्रस्वरुपा तृप्यता मेतत्सतिलोदकं तस्यै स्वधा ॥३॥ ओं अमुक गोत्रास्मत्प्रपितामही अमुकी देवी आदित्यस्वरूपा तृप्यता मेतत्सतिलोदकं तस्यै स्वधा ॥३॥

ओं द्वितीय गोत्रोस्मन्मातामहः अमुक देव शर्म्मा वसु स्वरूप स्तृप्यता मेतत्सतिलोदकं तस्मै स्वधा ॥३॥ ओं द्वितीय गोत्रोस्मत्प्रमातामहः अमुक देव शर्म्मा रुद्र स्वरूप स्तृप्यता मेतत्सतिलोदकं तस्मै स्वधा ॥ ३ ॥ द्वितीयगोत्रोस्मद्वृद्धप्रमातामहः अमुक देवशर्म्मा आदित्य स्वरुप स्तृप्यता मेतत्सतिलोदकं तस्मै स्वधा ॥३॥

द्वितीय गोत्रास्मन्मातामही अमुकी देवी वसु स्वरूपा तृप्यता मेतत्सतिलोदकं तस्यै स्वधा ॥३॥ द्वितीय गोत्रास्मत्प्रमातामही अमुकी देवी रुद्र स्वरुपा तृप्यता मेतत्सतिलोदकं तस्यै स्वधा ॥३॥ द्वितीय गोत्रास्मद्वृद्धप्रमातामही अमुकी देवी आदित्य स्वरुपा तृप्यता मेतत्सतिलोदकं तस्यै स्वधा ॥३॥

ततः पितृव्य मातुल पितृष्वसा मातृष्वसा गुरु श्वशुर वन्धु ज्ञातिभ्यः उपर्युक्त रूपेण एकैक मञ्जलिं दत्त्वा ।

निवीती कुश मध्यै रुदङ्मुःखः श्वेततिलैऋषितीर्थेन द्विर्द्वि-स्तर्पयेत्

ओं सनकस्तृप्यतु ॥२॥ ओं सनन्दन स्तृप्यतु ॥२॥ ओं सनातन स्तृप्यतु ॥२॥ ओं कपिल स्तृप्यतु ॥२॥ ओं आसुरि स्तृप्यतु ॥२॥ ओं वोढुस्तृप्यतु ॥२॥ ओं पञ्च शिखस्तृप्यतु ॥२॥

केचिदत्र भोष्मतर्पणं कुर्वन्ति, अन्ये भीष्मतिथावेव कुर्वन्ति तत्प्रकारस्तु दर्श्यते यथाचारं कर्त्तव्यम् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं वैयाघ्रपद्य गोत्राय सांकृति प्रवराय च ॥
अपुत्राय ददाम्येत त्सलिलं भीष्मवर्म्मणे ॥
कृताञ्जलिः—ओं भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ॥
आभि रद्भिरवाप्नोतु पुत्र पौत्रो चितां क्रियाम् इति ॥

ततः ओं आब्रह्म स्तम्ब पर्यन्तं देवर्षि पितृमानवाः ॥ तृप्यन्तु पितरः सर्वे मातृ माता महादयः ॥ अतीतकुलकोटीनां सप्तद्वीप निवासिनां ॥ आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकम् ॥ * इत्यञ्जलि त्रयं दद्यात् ॥

ततः ओं येवान्धवाऽवान्धवा वा येऽन्यजन्मनि वान्धवाः ॥ तेतृप्ति मखिलां यान्तु येचास्मत्तोय कांक्षिणः ॥ इत्यञ्जलिं दद्यात् ॥

ततः ओं येचास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः ॥
तेतृप्यन्तु मया दत्तं वस्त्र निष्पीड़नोदकम् ॥
इति जलाद्बहिर्वस्त्रं निष्पीड़येत् ततः कृताञ्जलिः ॥
ओं पिता स्वर्गः पिता धर्म्मः पिताहि परमन्तपः ॥
पितरि प्रीति मापन्ने प्रीयन्ते सर्वदेवताः ॥
ओं पितृन्नमस्ये दिविये च मूर्त्ताः स्वधा भुजः कामफलाभिसन्धौ॥
प्रदान शक्ताः सकलेप्सितानां विमुक्तिदा येऽनभि संहृतेषु ॥
इति पितृन् प्रणम्य ओं अनेन देवर्षि पितृ तर्पणेन देवर्षि पितृ-लोकाः प्रीयन्ताम् ॥
ओं यस्यस्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ॥

---

* मयादत्तेन तोयेन तृप्यन्तु भुवन त्रयम् इतिच पाठः ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ओं अच्युतायनमः ॥३॥

ततो यथानियमं अष्टोत्तरशतं गायत्रीं जत्वा एतौ सामनी गायेत् ॥

ओं औहौहोवाहोइ ।२। औहो होवा हा ३१ उ। वा २३ । भू २३४ वात्। विभ्राड् बृहत्पिवतु सोम्यम्म। ध्वौहौहोवाहोइ औहौहोवाहोइ । औहौहोवा हा ३१ उ। वा २३। जा २३४ नात्। आयुर्दधद्यज्ञपतावविह्वुतम् । औहौहोवाहोइ । २। औहौहोवाहा ३१ उ। वा २३। वा २३४ धात्। वातजूतो यो अभि रक्षतित्मना। औहौहोवाहोइ । २। औहौहोवा हा ३१ उ। वा २३। का २३४ रात्। प्रजाः पिपर्त्ति वहुधा विराजति। औहौहोवाहोइ।२। औहौ होवा हा २३ उ। वा २। ए। अभ्राजीज्योतिरभ्राजी २३४ ५त् ॥१॥

वण्महा ३ॐ असि सूर्या। वाड़ा दित्य। महाॐ आ १ सा २३४ इ। महस्ते सतो महिमा पनि। ष्टा ३ मा। मह्वादा २३ इवा ३। महो २३४ वा। आ ५ सो ६ हायि ॥२॥

गानाशक्तौ ऋच स्त्रिधापठेत्

ओं विभ्राड् बृहत्पिवतु सोम्यं मध्वायु र्दधद्यज्ञपतावविह्वुतम् ॥ वात जूतो यो अभिरक्षतित्मना प्रजाः पिपर्त्ति वहुधा विराजति ॥१॥ वण्महाॐ असि सूर्य वड़ा दित्य महाॐ असि ॥ महस्ते सतो महिमा पनिष्टम मह्वा देव महाॐ असि ॥२॥

ततः सहस्रनामादि ईश्वरस्तुतीर्विधाय ओं अनेन मध्याह्न

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन्ध्यो पासनेन एतावत्संख्यक गायत्री जपेन भगवान् रुद्र स्वरुपी सविता प्रीयताम् ।।

ओं यदक्षर पदभ्रष्टं मात्रा हीनञ्च यद्भवेत् ।।
तत्सर्वं क्षम्यतान्देव प्रसीद परमेश्वर ।।

इति मध्याह्न सन्ध्योपासन प्रयोगः ।।

अथ पृष्ठोदिवि विधानम् ।।

ओं विष्णु ३ र्नमः परमात्मने अद्य हेत्यादि देशकालौ संकीर्त्य अमुक गोत्रः अमुकराशिः अमुक शर्म्माहं वृथापाक दोष निवारण द्वारा वैश्वदेव सिद्ध्यर्थं मग्निसंस्कारं करिष्ये इति संकल्प्य ।

ओं अन्वग्निरित्यस्य पुरोधा ऋषि स्त्रिष्टुपछन्दोग्निर्देवता ग्रामा दग्न्याहरणे विनियोगः ।।

ओं अन्वग्नि रुषसा मग्र मख्य दन्वहानि प्रथमो जातवेदाः ।। अनुसूर्यस्य पुरुत्रा च रश्मी ननुद्यावा पृथिवी आततन्थ ।।१।।

इति ग्रामादग्नि माहृत्य भूसंस्कारं कुर्यात् भूमिं कुशैस्त्रिः परिसमूह्य गोमयोदकेनोपलिप्य स्फ्येन कुशमूलेन वा चत्वारः प्रागग्राः एका उदगग्रा प्रागग्र मूलसंहता एवं पञ्चरेखा उल्लिख्य * अंगुष्ठा-

---

* स्थण्डिल मध्य भागे दक्षिणतः प्राग्रग्रां द्वादशां गुल दीर्घां रेखा मुल्लिख्य तत्पश्चिम संलग्ना मुदग्रग्रा मेक विंशत्यगुल दीर्घां रेखा मुल्लिख्य प्रथम रेखातः उत्तरे सप्ताङ्गुलान्तरे पश्चिम रेखा संलग्नां प्रागग्रां दशाङ्गुल दीर्घां रेखा मुल्लिख्य ततोप्युत्तरे सप्ताङ्गुलान्तरे पश्चिम रेखा संलग्नां दशाङ्गुलदीर्घां प्रागग्रां रेखामुल्लिख्यततोप्युत्तरे सप्ताङ्गुलान्तरे पश्चिम रेखाग्र संलग्नां प्राग्रगां दशांगुल दीर्घां रेखा मुल्लिखे दिति पञ्च रेखा करण विधिः चित्रे स्पष्टी कर्त्तव्यम् ।।



CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नामिकाभ्यां पञ्चभ्यो रेखाभ्य उत्करं गृहीत्वा नैऋत्यां निरस्य कुशोदके नाभ्युक्षेत्। एवं भूमिं संस्कृत्य—

समाचारात्क्रव्यादाग्नि निरसनं कुर्यात्—ज्वलन्तमङ्गार मेकं गृहीत्वा।

ओं क्रव्यादमित्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दोग्निर्देवता पूर्वार्द्धेन क्रव्यादाग्नि निरसनेऽ परार्धेन शुद्धीकरणे विनियोगः॥

ओं क्रव्याद मग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः॥ ततस्तमंगारं निरस्य शेषमग्निं स्पृष्ट्वा जपेत्।

ओं इहैवाय मितरो जातवेदादेवेभ्यो हव्यं वहतु प्रजानन्॥

ओं पृष्ठोदिवीत्यस्य कुत्सऋषि स्त्रिष्टुप् छन्दो वैश्वानरो देवता अग्निस्थापने विनियोगः॥

ओं पृष्ठोदिवि पृष्ठो अग्निः पृथिव्यां पृष्ठो विश्वाओषधो राविवेश। वैश्वानरः सहसा पृष्ठो अग्निः सनो दिवा स रिषस्पातुनक्तम्॥ ओं भूर्भुवः स्वरोम्॥

इति अग्निं संस्थाप्य

ओं समिति मितिद्वयो र्मधुच्छन्दसुत जेताऋषिः उष्णिगुपरिष्टा द्बृहती छन्दोऽग्निर्देवता अग्न्युपस्थाने विनियोगः॥

ओं समितँ संकल्पेथाँ सम्प्रियौ रोचिष्णू सुमनस्यमानौ। इषमूर्ज मभि सम्वसानौ॥१॥

ओं संवाम्मनाँसि सम्व्रता समुचित्तान्याकरम्। अग्ने पुरीष्याधिपाभवत्वन्न इषमूर्ज यजमानाय धेहि॥१॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजा ऋषयो गायत्र्युष्णिगनुष्टुभश्छन्दाᳬस्यग्नि वायु सूर्या देवताः, गायत्र्या विश्वामित्र ऋषिर्गायत्रो छन्दः सविता देवता, ताᳬ सवितु रित्येतस्य कण्वऋषि स्त्रिष्टुप् छन्दः सूर्यो देवता विश्वानीत्यस्य नारायण ऋषि र्गायत्री छन्दः सविता देवता, पुनस्त्वेत्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता अग्नि प्रज्वालने समिन्धने च विनियोगः ॥

ओं भूर्भुवः स्वः ॥ ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि ॥ धियोयोनः प्रचोदयात् ॥१॥ ओं ताᳬ सवितु र्वरेण्यस्य चित्रा माहं वृणे सुमतिं विश्वजन्याम् ॥ यामस्य कण्वो अदुहत्प्रपीनाᳬ सहस्र धाराम्पयसा महींगाम् ॥१॥ ओं विश्वानि देव सवित र्दुरितानि परासुव ॥ यद्भद्रन्तन्न आसुव ॥१॥ ओं पुनस्त्वादित्या रुद्रा वसवः समिन्धता म्पुनर्ब्रह्माणो वसुनीथ यज्ञैः ॥ घृतेनत्वं तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥१॥

इतिं अग्निं प्रज्वाल्य समिन्ध्य

ओं वाक् । मनः प्राणः प्राणो पानो व्यान श्चक्षुः श्रोत्रं शर्म्म वर्म्म भूति प्रतिष्ठा । एता एव सुमहाव्रताः सर्वा वा एता विराजो दशिनी प्रथमा विᳬशिनी द्वितीया त्रिंशिनी तृतीयैषावै परमा विराट् यच्चत्वारिᳬशद्रात्रयः पंक्तिर्वैपरमा विराट् परमायामेव विराजि प्रतितिष्ठन्ति ॥

इत्यक्षतै रग्निं प्रतिष्ठाप्य

ओं पावक नामाग्ने इहागच्छ इहतिष्ठ सुप्रतिष्ठितो वरदो भव ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं पावक नामाग्नये नमः इति गन्धादिभिः सम्पूज्य ध्यानम् ॥

अस्य वामदेव ऋषि र्ब्राह्मु ष्णिक् छन्दो यज्ञ पुरुषो देवता ध्याने विनियोगः ॥ ओं चत्वारिश्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ॥ त्रिधाबद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥

ओं सर्वतः पाणि पादान्तः सर्वतोक्षि शिरोमुखः ॥
विश्वरुपो महानग्निः प्रणीतः सर्व कर्म्मसु ॥
एवं ध्यात्वा तस्मिनग्नौ पाकं कृत्वा वैश्वदेवं कुर्यात् ॥

इति पृष्ठोदिवि विधानम् ॥

अथ वैश्वदेवः ॥

आचम्य प्राणानायम्य सोम साम पठेत् । ओं सोमꣳ राजान म्वरुणाम् । अग्निमन्वारभामहे ३ । होवा ३ हायि । आदित्यम्बिष्णु ꣳ सूर्यम् । होवा ३ हायि । ब्रह्माणा २३ च्चा ३ । होवा ३ हायि । बृहा ३ उवा ३ । पा २३४ तीम् ॥१॥ अर्घ्यस्थापनं कृत्वा संकलपं कुर्यात् ।

ओं विष्णु ३ र्नमः परमात्मने अद्येहेत्यादि देशकालौ संकीर्त्य अमुक गोत्रः अमुकराशिः अमुकशर्म्माहं पंच सूना जजनितैनो निवर्हण द्वारा श्रीपरमेश्वर प्रीत्यर्थं पावकाग्नौ वैश्वदेवं करिष्ये ।

ओं भूतमिति ब्रू ३हि । इति पत्नीं प्रवाचयेत् । पत्नीच—
ओं भूतम् । इतिवदेत् ततः उपांशु
ओं तस्मैनम स्तन्माख्या । इत्युक्त्वा ।

अस्य मन्त्रस्य परमेष्ठी ऋषि रनुष्टुप् छन्दोऽग्निर्देवता भूमिजपे विनियोगः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं इदं भूमे र्भजामह इदं भद्र७ सुमङ्गलम् ॥
परा सपत्नान् वाधस्वान्येषां विन्दते धनम् ॥

इत्यग्नेः पश्चाद्भूमौ न्यञ्चौ पाणी कृत्वा जपेत् ततः

एषां मन्त्राणां प्रजापतिर्ऋषिरेकपदागायत्रीछन्दोऽदित्यनुमति सरस्वत्यो देवताः उदकाञ्जलि सेके विनियोगः ॥

ओं अदितेऽनुमन्यस्व । नैर्ऋत्या दाग्नेयान्तं ।
ओं अनुमतेऽनुमन्यस्व । नैर्ऋत्या द्वायव्यान्तं ।
ओं सरस्वत्यनुमन्यस्व । वायव्या दीशानान्तं ।

अस्य प्रजापतिर्ऋषि र्यजुः सविता देवता अग्नि र्युपयक्षणे विनियोगः ॥

ओं देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिम्भगाय ॥ दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥

इत्यग्निं पर्युक्ष्य एकां समिधं तूष्णीमग्नौ हुत्वा वक्ष्यमाणा आहुती र्जुहुया दन्नेन तण्डुलेन वा ॥

१ । ओं भूः स्वाहा । इदमग्नये नमम । २ । ओं भुवः स्वाहा । इदं वायवे नमम । ३ । ओं स्वः स्वाहा । इदं सूर्याय नमम । ४ । ओं देवकृतस्यैनसोवयजनमसि स्वाहा । इदमग्नये नमम । ५ । ओं पितृकृतस्यैनसोवयजनमसि स्वाहा । इदमग्नये नमम । ६ । ओं मनुष्यकृतस्यैनसोवयजनमसि स्वाहा । इदमग्नये नमम । ७ । ओं अस्मत्कृतस्यैनसोवयजनमसि स्वाहा । इदमग्नये नमम । ८ । ओं

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यद्दिवाचनक्तंचैनश्चकृम तस्यावयजनमसि स्वाहा । इदमग्नये नमम ।९। ओं यत्स्वपंतश्च जाग्रतश्चैनश्चकृमतस्यावयजनमसि स्वाहा । इदमग्नये नमम । १० । ओं यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम-तस्यावयजनमसि स्वाहा । इदमग्नये नमम । ११ । ओं एनस एनसोवयजनमसि स्वाहा । इदमग्नये नमम । १२ । ओं अग्नये स्वाहा । इदमग्नये नमम । १३ । ओं धन्वन्तरये स्वाहा । इदं धन्वन्तरये नमम । १४ । ओं विश्वेभ्योदेवेभ्यः स्वाहा । इदं विश्वेभ्यो देवेभ्यो नमम । १५ । ओं प्रजापतये स्वाहा । इदं प्रजापतये नमम । १६ । ओं अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते नमम ॥

एता आहुतीर्हुत्वा तूष्णी मेकां समिध मग्नौ हुत्वा ।

ओं देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिम्भगाय । दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥१॥

इति पर्य्युक्ष्य पूर्ववत्प्रसिञ्चेत् ।

ओं अदितेऽन्वमꣳ स्थाः । नैर्ऋत्या दाग्नेयान्तं
ओं अनुमतेऽन्वमꣳ स्थाः । नैर्ऋत्या द्वायव्यान्तं
ओं सरस्वत्यन्वमꣳ स्थाः । वायव्या दीशानान्तं

ततः अग्निं प्रदक्षिणीकृत्य, चमसजलं निनीय, पुनः पूरयित्वा अनेन वैश्वदेव होमाख्येन कर्म्मणा श्री यज्ञ पुरुषः प्रीयता न्नमम ॥

अथ बलिहरणं ।

अग्नेः पश्चात् भूमिं परिष्कृत्य भूमौ पात्रे वा वक्ष्यमाण मन्त्रै श्चित्र

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रदर्शित क्रमेण आदौ जलं ततो वलिः पुनर्जलमिति क्रमेण वलिहरणं कुर्यात्। अद्येह भूत पितृ मनुष्यलोक प्रीतये वलिहरणं करिष्ये इति संकल्प्य —

			पू				
			१२	८	४		
		१७	११	७	३		
उ.	१६	१५	१०	६	२	१८	द.
		१३	९	५	१	१४	
२६	२५	२४	२३	२२	२१	२०	१९
			प.				

१ ओं पृथिव्यै नमः इद म्पृथिव्यै नमम। २ ओं वायवे नमः। इदं वायवे नमम। ३ ओं विश्वेभ्यो देवेभ्यो नमः। इदं विश्वेभ्यो देवेभ्यो नमम। ४ ओं प्रजापतये नमः। इदं प्रजापतये नमम। ५ ओं अद्भ्यो नमः। इदमद्भ्यो नमम। ६ ओं ओषधिवनस्पतिभ्यो नमः। इदमोषधि वनस्पतिभ्यो नमम। ७ ओं आकाशाय नमः। इदमाकाशाय नमम। ८ ओं कामाय नमः। इदं कामाय नमम। ९ ओं मन्यवे नमः। इदं मन्यवे नमम। १० ओं इन्द्राय नमः। इद मिन्द्राय नमम। ११ ओं वासुकये नमः। इदं वासुकये नमम। १२ ओं ब्रह्मणे नमः। इदं ब्रह्मणे नमम। १३ ओं रक्षोजनेभ्यो नमः। इदं रक्षोजनेभ्यो नमम। अपउपस्पृश्य। १४ प्राचीनावीती ओं पितृभ्यः स्वधा। इदं पितृभ्यो नमम अपउपस्पृश्य। १५ उपवीती ओं व्रीहिभ्यो नमः इदम्व्रीहिभ्यो नमम। यव नवान्नात्परं यवेभ्यो नमः। इदं यवेभ्यो नमम। १६ ओं यक्ष्मैतत्ते निर्णेजनं नमः। इदं यक्ष्मणे नमम। १७ निवीती सनकादि मनुष्येभ्यो हन्त। इदं सनकादि मनुष्येभ्यो नमम। ततो जलमादाय अनेन बलिहरण कर्म्मणा भूत-पितृ मनुष्य लोकाः प्रीयन्तान्नमम।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ नित्यश्राद्धम् ।

अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्राणां अस्मत्पितृ पितामह प्रपितामहानां अमुकामुकशर्म्मणां वसु रुद्रादित्य स्वरूपाणां सपत्नीकानां तथा अमुकगोत्राणां अस्म न्मातामह प्रमातामह वृद्ध प्रमातामहानां अमुकामुकशर्म्मणां सपत्नीकानां वसुरुद्रादित्य स्वरूपाणां अक्षयतृप्ति कामनया नित्य श्राद्धमहं करिष्ये इति संकल्प्य

ओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच ।
नमः स्वधायै स्वाहायै नित्यमेव नमोनमः ॥
इति त्रिः पठित्वा अपसव्येन ।

ओं सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ।
तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेद पारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ।
श्राद्धकाले गयां ध्यात्वा । ध्यात्वा देवं गदाधरम् ।
मनसाच पितृन्ध्यात्वा नित्य श्राद्धं समारभे ।

ततः चतुर्त्थ्यन्तेनासनदानं अद्येहामुक गोत्रेभ्यः पितृपितामह प्रपितामहेभ्य अमुकामुक शर्म्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्य स्वरूपेभ्य नित्यश्राद्धे इद मासनं आस्यताम् (आस्ये) ।

ओं पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्य स्वधायिभ्यः स्वधानमः ॥ अक्षन्नियतरो मीसदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततोऽर्चन संकल्पः । गन्धाक्षत पुष्प धूपदीप नैवेद्यानि समर्प्य

अद्येह अमुकगोत्राः अस्मत्पितृ पितामह प्रपितामहाः अमुकामुक शर्म्माणः सपत्नीका वसुरुद्रादित्य स्वरूपा तथा अमुक गोत्रा अस्म न्मातामह प्रमातामह वृद्ध प्रमातामहाः अमुकामुक शर्म्माणः सपत्नीका वसुरुद्रादित्य स्वरूपा अर्चन विधौ इमानि गन्धाक्षत पुष्प धूप दीप नैवेद्यादीनि स्वधा ।

ततः अन्नं निधाय संकल्पः

अद्येह अमुक गोत्रेभ्यः अस्म त्पितृ पितामह प्रपितामहेभ्यः अमुकामुक शर्म्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्य स्वरूपेभ्यः तथा अमुक गोत्रेभ्योऽस्म न्मातामह प्रमातामह वृद्ध प्रमातामहेभ्यः अमुकामुक शर्म्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरुपेभ्यः नित्यश्राद्धे इद मन्नं (आमान्नं) षड्धा विभज्य वः स्वधा ।

उदकोपस्पर्शः स्वतिलकं --

ओं सत्यानुष्ठान सम्पन्नाः सर्वदा यज्ञ बुद्धयः ॥
पितृ मातृ पराश्चैव सन्त्वस्मत्कुलजा नराः ॥
अथ विशेष पूजा-गन्धाक्षत पुष्पाणि अन्नोपरि समर्प्य
ओं आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्तु तथा राज्यं नृणां प्रीताः पितामहाः ॥
आयुः पुत्रान् यशः स्वर्गं कीर्त्तिं पुष्टिं वलं श्रियम् ॥
पशून्सुखं धनं धान्यं प्राप्नुयाम्पितृपूजनात् ॥
देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच ।
नमः स्वधायै स्वाहायै नित्यमेव नमोनमः ॥ त्रिवारं ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः शरद्वोपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥

इदं नित्य श्राद्धं विधिहीनं देशहीनं कालहीनं क्रियाहीनं श्रद्धा-हीनं यत्कृतं तत्सुकृतमस्तु यन्नकृतं लोभान्मोहात्प्रमादा त्तच्छ्री विष्णोः प्रसादाद्ब्राह्मणानां वचनात् सर्वं परिपूर्ण मस्तु ॥ अस्तु परिपूर्णम् ॥ इति प्रति वचनम् ।

इति नित्यश्राद्धम् ॥

अथ बाह्य वलयः ॥

१९ । देवा मनुष्याः पशवो वयांसि,
सिद्धाः सयक्षोरग दैत्यसंघाः ॥
प्रेताः पिशाचा स्तरवः समस्ता,
ये चान्न मिच्छन्ति मया प्रदत्तम् ॥
इदं देवादिभ्यो नमम ॥

२० । पिपीलिकाः कीट पतङ्गकाद्या,
वुभुक्षिताः कर्म्म निवन्ध वद्धाः ॥
प्रयान्तुते तृप्तिमिदं मयान्नं,
तेभ्यो विसृष्टं सुखिनो भवन्तु ॥
इदं पिपीलिकादिभ्यो नमम ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२१ । येषां नमाता नपिता नवन्धु,
नैंवान्न सिद्धिर्नतथान्न मस्ति ॥
तत्तृप्तयेऽनं भुविदत्त मेतत्,
प्यान्तु तृप्तिं मुदिता भवन्तु ॥
इद मनाथेभ्यो न्नहीनेभ्यो नमम ॥

२२ । भूतानि सर्वाणि तथान्न मेत,
दहश्च विष्णु र्नयतोऽन्य दस्ति ॥
तस्मादहं भूत निकाय भूत,
मन्नं प्रयच्छामि भवायतेषाम् ॥
इदं भूतेभ्यो नमम ॥

२३ । चतुर्दशो भूतगणो यएष,
तत्रस्थितायेऽखिलभूत संघाः ॥
तृप्त्यर्थ मन्नं हि मया विसृष्टं,
तेषामिदन्ते मुदिता भवन्तु ॥
इदं चतुर्दश भूतगणेभ्यो नमम ॥

२४ । ऐन्द्र वारुणवायव्या सौम्या वै नैर्ऋतास्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ पिंडं मयाऽर्पितम् ॥
इदं वायसेभ्यो नमम ॥

२५ । सौरभेय्यः सर्वाहिताः पवित्राः पुण्य राशयः ।
प्रतिगृह्णन्त्विमं ग्रासं गाव स्त्रैलोक्य मातरः ॥
इदं गोभ्यो नमम ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२६ । श्वानौ द्वौ श्याम शवलौ वैवस्वत कुलोद्भवौ ।
ताभ्यां पिण्डं प्रदास्यामि स्याता मेतावहिंसकौ ।
इदं श्वभ्यो नमम ॥
ततो जलमादाय अनेन व लिहरण कर्म्मणा भूत पितृ
मनुष्यलोकाः प्रीयन्ताम् ॥

पात्रस्थं जलशेषं निरस्य पुनर्जलेनापूर्य्य, नित्यस्वाध्यायं कुर्यात् अद्येह अमुक गोत्रः अमुकराशिः अमुक शर्म्माहं ऋषिलोक प्रीतये नित्यस्वाध्यायं करिष्ये इति संकल्प्य ।

ओं अग्न आयाहिवीतये गृणानो हव्य दातये । निहोता सत्सि-वर्हिषि ॥१॥ त्वमग्ने यज्ञानां होता विश्वेषाꣳहितः । देवेभिर्मानुषे जने ॥ २ ॥ अग्निन्दूतं वृणीमहे होतारं विश्व वेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥३॥

ओग्नायि । आयाही ३ वोइतोया २ यि । तोया २ यि । गृणा-नोह । व्यदातोया २ यि । तोया २ यि । नायि होतासा २३ । त्सा २ यि वा २३४ औ होवा । ही २३४ षी ॥१॥

अग्न आयाहिवी । तयायि । गृणानोहव्यदाता २३ यायि । निहो-तासत्सिवर्हा २३ यिषी । वर्हा २ यिषा २३४ औ होवा । वर्हीं ३ षी २३४५ ॥२॥

अग्न आयाहि । वा ५ यितयायि । गृणानोहव्य दा १ ता ३ ये । निहोता २३४ सा । त्सा २३ यिवा ३ । हा २३४ यिषो ६ हायि ॥३॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वमग्नेयज्ञानाम्। त्वमग्नायि। यज्ञाना७ होता। विश्वे पा७ हा २३ यिताः। देवैभा २३ यिर्म्मा। नुषेजना। ओ ३ होवा। हो ५ यि। डा ॥४॥

अग्निन्दूताम्। वृणीमहायि। होतारा २३ म्बो। श्ववेदसाम्। अस्य या २३ ज्ञा। आ। ओ ३ होवा। स्यासुक्रतुम्। इडा २३ भा ३४३। ओ २३४५ यि। डा ॥५॥

ततो यथाशक्ति वेदंपठित्वा अनेन नित्य स्वाध्यायेन श्री ऋषयः प्रीयताम्। ओं एभिः पञ्चभिर्म्महायज्ञैः श्रीभगवान् सर्वान्तरात्मा यज्ञपुरुषः प्रीयताम्। अथ अग्नि प्रार्थना ॥

ओं आरोग्यमायु रैश्वर्यं धीर्धृतिः शं वलं यशः।
ओजोवर्चः पशून्वीर्यं ब्रह्म ब्राह्मण्यच मेव च ॥
सौभाग्यं कर्म सिद्धिश्च कुलज्यैष्ठ्यं सुकर्तृताम्।
सर्वमेतत्सर्वसाक्षिन्द्रविणोदो रिरीहिणः ॥

ततो वामदेव्यं गायेत् ॥

का ५ या। नश्चा ३ यित्रा ३ आभुवात्। उ। तीसदावृधः स। खा। औ ३ हो हायि। कया २३ शचायि। ष्ठयौ हो ३। हुम्मा २। वा २ र्त्तो ३५ हायि ॥

का ५ स्त्वा। सत्यो ३ मा ३ दानाम्। मा। हिष्ठोमात्सा दन्ध। सा। औ ३ हो हायि। दृढ़ा २३ चिदा। रुजौ हो ३। हुम्मा २। वा २ सो ३५ हायि ॥

आ ५ भो। षुणा ३ः सा ३ खीनाम्। आ। विता जरा यितृ। णाम्। औ २३ हो हायि। शता २३ म्भवा। सियौ हो ३। हुम्मा २। ता २ यो ३५ हायि ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कयानश्चित्र आभुवदूती सदावृध' सखा । कया शचिष्ठया-वृता ॥१॥ कस्त्वा सत्यो मदानाम्मꣳ हिष्ठोमत्सदन्धसः । दृढ़ा चिदा रुजे वसु ॥२॥ अभीषुणः सखीना मविता जरितृणाम् ॥ शतम्भवा-स्यूतये ॥३॥ स्वस्तिन इन्द्रोवृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्योंऽ अरिष्ट नेमिः स्वस्तिनो वृहस्पतिर्दधातु ओं स्वस्ति-दोवृहस्पतिर्दधातु ॥४॥

प्रार्थना ।

ओं कालेवर्षतुपर्ज्जन्यः पृथिवी शस्यशालिनी ।
देशोऽयंक्षोभ रहितो ब्राह्मणाः सन्तु निर्भयाः ॥१॥
सर्वेपि सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वेभद्राणि पश्यन्तु माकश्चिद्दुःखमाप्नुयात् ॥
अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः ॥
निर्धनाः सधनाः सन्तु जीवन्तु शरदाꣳ शतम् ॥

ओं चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥४॥
अज्ञानाद् यदिवा मोहात् प्रच्यवेता ध्वरेषुयत् ॥
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥५॥
ओं विष्णवे नमो विष्णवे नमो विष्णवे नमः ॥३॥

इति वलिहरण विधिः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ भोजन विधिः

वलिहरणान्ते पाचितानि भोजनीयानि देवेभ्यो निवेद्य सर्वेषु-तुलसी दलं दत्त्वा, अतिथीन् भोजयित्वा, स्वयं भुञ्जीत। तत्प्रकारो यथाः—आसने उपविश्य आचम्य पात्रे परिविष्टे अन्नं नमस्कृत्यजलेन ओं सत्यन्त्वर्त्तेन परिषिञ्चामि इति प्रातः, ओं ऋतन्त्वा सत्येन परिषिञ्चामि इति सायं परिषिञ्चेत। ततः अन्नमालभ्य जपेत्।

ओं अन्तश्चरसि भूतेषुगुहायां विश्वतोमुखः ॥ त्वं यज्ञस्त्वं वषट्कार स्त्वं ब्रह्मात्वं प्रजापतिः ॥ आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोम् ॥

ततो भूमौ वक्ष्यमाणमन्त्रै र्वलीन्दद्यात्।

ओं भूपतये नमः, ओं भुवनपतये नमः। ओं भूतानाम्पतये नमः॥ ओं धर्म्मराजाय नमः। ओं चित्राय नमः। ओं चित्रगुप्ताय नमः। ओं यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम्। प्रेतानांतृप्तयेऽक्षय्य-मिदमस्तु यथासुखम्॥ ओं नागाय नमः। ओं कूर्म्माय नमः। ओं कृकराय नमः। ओं देवदत्ताय नमः। ओं धनञ्जयाय नमः॥

एषां वलीना मुपरिजलंदत्वा गण्डूष मात्रं जलं गृहीत्वा ओं अमृतोपस्तरण मसि स्वाहा इति पिवेत् ततो मौनी मनसा मन्त्र-मनुद्रुत्य दशनै रसंस्पर्शयन्वक्ष्यमाणमन्त्रै रन्नस्य ग्रासा न्निगिरेत्॥*

---

*अंगुष्ठतर्जनी मध्यमाभिः प्राणाय। अंगुष्ठमध्यमानामिकाभिरपानाय। अंगुष्ठानामिकाकनिष्ठिकाभिर्व्यानाय। तर्जनी वर्जाभि रुदानाय। सर्वाभिः समानाय। एताएव ग्रास मुद्राः॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं प्राणाय स्वाहा। ओं अपानाय स्वाहा। ओं व्यानाय स्वाहा। ओं उदानाय स्वाहा। ओं समानाय स्वाहा।

ततो यथासुखं भुक्त्वा गण्डूष मात्रं जलं गृहीत्वा ओं अमृता पिधान मसि स्वाहा इति पीत्वा उत्थाय षोड़श गण्डूषैर्मुखंप्रक्षाल्य आचम्य यथासुखं विहरेत्॥

इति भोजन विधिः।

अथ सायं सन्ध्या विधिः।

तत्रादौ हस्तौ पादौ प्रक्षाल्य वस्त्रं शुद्धं सन्धार्योपविश्य शुद्धं-भस्म गृहीत्वा शुष्कमेव धारयेत्।

ओं मानस्तोक इत्यस्य वसिष्ठऋषिर्जगतीच्छन्द इन्द्रो देवता भस्माभिमन्त्रणे विनियोगः।

ओं मानस्तोकेतनये मान आयौ मानो गोषु मानो अश्वेषु-रीरिषः॥ वीरान्मानो रुद्रभामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे॥

इत्यभिमन्त्र्य ओं त्र्यायुष मित्यस्य प्रजापति ऋषिर्यजुः प्रजापति र्देवता भस्मलेपने विनियोगः॥

ओं त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुष मगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम्॥

इति मन्त्रेण ललाटे ग्रीवायां अंसयोः वाह्वोः हृदये पृष्ठे च क्रमेण भस्मना त्रिपुण्ड्रं कुर्यात्। ततः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं ब्रह्मवाणी सहस्राणि शिववाणी शतानि च ॥
विष्णोर्नाम सहस्रेण शिखावन्धं करोम्यहम् ॥

इति मन्त्रेण गायत्र्यावा शिखां वध्वा वामकर धृत कुशमुष्टिराचामेत् । ततो विष्णुस्मरणम् ।

ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षु राततम् ॥ ओं अपवित्रः पवित्रोवा सर्वावस्थां गतोऽपिवा ॥ यः स्मरेत् पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः॥ ओं विष्णुः पुण्डरीकाक्षः पुनातु ॥

अथ संकल्पः ॥ ओं विष्णु ३ र्नमः परमात्मने अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रः अमुकप्रवरः सामवेदीयः कौथुमी शाखाध्यायी जन्मनामतः अमुकराशिः प्रसिद्ध नामतः अमुक राशिः अमुक शर्म्माहं आत्मसंस्कार द्वारा अद्योपात्त सकल दुरितक्षयाय ब्रह्मलोकावाप्तये सायं सन्ध्योपासन महं करिष्ये इति संकल्प्य ।

ओं पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मो देवता आसनोपवेशने विनियोगः । आसनं धृत्वापठेत् ।

ओं पृथ्वित्वया धृतालोका देवित्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरुचासनम् ॥

मार्जनम् ॥ ओं भूः पुनातु । ओं भुवः पुनातु । ओं स्वः पुनातु । ओं महः पुनातु । ओं जनः पुनातु । ओं तपः पुनातु । ओं सत्यं पुनातु । ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् पुनातु ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

करन्यासः ।। ओं भूः अंगुष्ठाभ्यां नमः ।। ओं भुवस्तर्जनीभ्यां नमः ।। ओं स्वः मध्यमाभ्यां नमः ।। ओं तत्सवितुर्वरेण्यं अनामिकाभ्यां नमः ।। ओं भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यां नमः ।। ओं धियो योनः प्रचोदयात् करतल करपृष्ठाभ्यां नमः ।।

अङ्गन्यासः ।। ओं भूः हृदयाय नमः ।। ओं भुवः शिरसे स्वाहा ।। ओं स्वः शिखायैवषट् ।। ओं तत्सवितुर्वरेण्यम् कवचाय हुम् ।। ओं भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् ।। ओं धियोयोनः प्रचोदयात् अस्त्राय फट् ।।

ध्यानम् ।। वृद्धां सरस्वतीं कृष्णां पीतवस्त्रां चतुर्भुजाम् ।। शंख चक्र गदा पद्म हस्तां गरुडवाहिनीम् ।। सामवेद कृतोत्संगां वनमाला विभूषिताम् ।। वदर्याश्रम वासांता मायान्तीं सूर्यमण्डलात् । आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनी ।। गायत्रिच्छन्दसां मातर्ब्रह्मयोनि नमोस्तुते ।।

ततो जलेनात्मानं परिवेष्ट्य हस्तेजलमादाय ओंकारस्य ब्रह्मा-ऋषि र्दैवीगायत्री च्छन्दोग्निर्देवता सर्वकर्म्मारम्भे विनियोगः ।। सप्त-व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजात्रि गोतम वसिष्ठ कश्यपा ऋषयः गायत्र्युष्णिगनुष्टुब्बृहती पंक्ति त्रिष्टुब् जगत्यश्छन्दाꣳ स्यग्नि वाय्वादित्य वृहस्पति वरुणेन्द्र विश्वेदेवा देवताः, गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता, शिरसः प्रजापतिर्ऋषि र्गायत्री-च्छन्दो ब्रह्माग्नि वायुसूर्या देवताः, प्राणायामे विनियोगः ।।

ओं भुः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्यम् । ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियोयोनः प्रचोदयात् ओं आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥

अनेन मन्त्रेण पूरक कुम्भक रेचकाख्यं त्रिवारं प्राणायामं विधाय मन्त्राचमनं कुर्यात् ॥

ओं अग्निश्चेत्यस्य ब्रह्माऋषिः प्रकृतिश्छन्द आपो देवता मन्त्राचमने विनियोगः ॥

ओ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षम्मनसावाचा हस्ताभ्यां पद्भ्यां मुदरेण शिश्ना अहस्तदवलुम्पतु। यत्किंच दुरितं मयि, इदमहमापोऽमृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥

इति गण्डूषार्धं जलं पीत्वा यथाविधि आचम्य ।

ओंकारस्य ब्रह्माऋषिर्दैवी गायत्रीछन्दोग्निर्देवता त्रिव्याहृतीनां विश्वामित्र जमदग्नि भरद्वाजा ऋषयः, गायत्र्युष्णिगनुष्टुभच्छन्दाꣳस्यग्निवाय्वादित्यादेवताः, गायत्र्या विश्वामित्रऋषिर्गायत्रीच्छन्दः सवितादेवता, आपोहिष्ठेति तिसृणां सिन्धुद्वीपऋषिर्गायत्रीच्छन्द आपो देवताः, मार्जने विनियोगः ॥

ओम्। ओं भूर्भुवः स्वः ॥ ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियोयोनः प्रचोदयात् ॥ ओं आपो हिष्ठा मयोभुवस्तान ऊर्जेदधातन। महेरणाय चक्षसे ॥ ओं योवः शिव तमो रसस्तस्य भाजयते हनः। उशती रिव मातरः ॥ ओं तस्मा अरंग मामवो यस्य क्षयाय जिन्वथ। आपो जनयथाचनः ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एभिर्मन्त्रै पृथक् पृथक् मार्जनं कृत्वा ।

ऋतञ्चेत्यादीना मघमर्षणऋषि रनुष्टुप् छन्दो भाववृत्तं दैवत मघमर्षणे विनियोगः ॥

ओं ऋतञ्च सत्यञ्चाभीद्धा त्तपसोऽअध्यजायत ॥
ततो रात्र्य जायत ततः समुद्रो अर्णवः ॥
समुद्रा दर्णवा दधि संवत्सरो अजायत ॥
अहो रात्राणि विदध द्विश्वस्य मिषतोवशी ॥
सूर्या चन्द्रमसौ धाता यथापूर्व मकल्पयत् ॥
दिवञ्च पृथिवीं चान्तरिक्ष मथो स्वः ॥

इति पठित्वा हस्तस्थोदके नासिका मवधाय श्वासं त्यक्त्वा तस्मिन्नुदके सर्वं पापं गत मिति भावयित्वा तदुदकं वहिः प्रक्षिप्य हस्तं प्रक्षाल्योपविशन्नेव सूर्याय त्रिरर्घ्यं दद्यात् ।

ओं गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता सूर्यायाञ्जलिदाने विनियोगः ॥

ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि ॥ धियोयोनः प्रचोदयात् । ततो मुक्ताञ्जलिः सूर्यमुपतिष्ठेत् ।

ओं उदुत्य मित्यस्य प्रस्कण्वऋषिर्गायत्री छन्दः सविता देवता, चित्र मित्यस्य कौत्सऋषिस्त्रिष्टुप् छन्दः सविता देवता, सूर्योपस्थाने विनियोग ॥

ओं उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशेविश्वाय सूर्यम् ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओ चित्रन्देवाना मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा-द्यावा पृथिवो अन्तरिक्ष ँ सूर्य आत्मा जगत स्तस्थुषश्च ॥

ततो गायत्रो जपः ॥ ओंकारस्य ब्रह्माऋषिर्दैवीगायत्री छन्दोऽग्नि-र्देवता, व्याहृतानां विश्वामित्र जमदग्नि भरद्वाजा ऋषयः गायत्र्युष्णि-गनुष्टुभश्छन्दा ँ स्यग्निवाय्वादित्या देवताः, गायत्र्या विश्वामित्र ऋषिर्गायत्रो छन्दः सविता देवता जपे विनियोगः ॥

ओं भूः ओं भुवः ओं स्वः ओं ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियोयोनः प्रचोदयात् ओं ॥

एवं गायत्रो मष्टोत्तरशतमावर्त्य एतानि सामानिगायेत्

आवुन्दंवृ । त्रहाद । दायि । जातःपृच्छा इत् । विमा २ ता २३४ राम् । कउग्रा २३ः के । हाशृण्विरे । इडा २३ भा ३४३ । ओ २३४५ यि । डा ॥१॥

ऋजु नोतीनो वरुणः । इहा । मित्रोनयति विद्वा २३ न्त्साः । इहा । अर्यमादा २३ यिवायि । इहा । सजोपा ३ उ वा ३ इ ३४ हा ॥२॥

प्रताइ । इहा । आयि । इहा । उवद । शी ३ आयती । आयती । उच्छा । इहा । आ । इहा । तीदु । ही ३ ता दिवा२ः । आदिवा२ः । अपो । इहा । उ । इहा । माहीवृणुते च । क्षुषा तमा२ः । आतमा२ः । ज्योताइ । इहा । आइ । इहा । कृणो । ती २ सूनरी । उनरी २३४३ । ओ २३४५ यि । डा ॥

उद्धे दभ्योवा । श्रुता मा २३४ घाम् । वृषाभन्ना । रिया २ पा

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२३४ साम्। आ २ स्ता। रा २३ मे। पाइ सूरिया। औ ३ होवा। हो ५ इ। डा ॥४॥

ओं आवुन्दं वृत्रहाददे जातः पृच्छाद्विमातरम् ॥

कउग्राः केहाशृण्विरे ॥१॥

ऋजुनीतोनोवरुणो मित्रो नयति विद्वान् ॥

अर्यमा देवैः सजोषाः ॥२॥

प्रत्यु अदर्शायत्युच्छन्ती दुहिता दिवः ॥

अपोमहीवृणुते चक्षुषातमो ज्योतिष्कृणोति सूनरी ॥३॥

उद्धेदभि श्रुतामघं वृषभन्नर्या पसम् ॥

अस्तार मेषि सूर्य ॥४॥

ततो विष्णु सहस्रनामादि जगदीश्वरस्तुती विधाय

ओं अनेन सायं सन्ध्योपासनेन एतावत्संख्यक गायत्री जपेन विष्णुस्वरुपी सविताप्रीयतान्नमम ॥ ओं तत्सत्।

इति सायं सन्ध्योपासनम् ॥

साय मौपासन होमेः प्रातर्वत् सूर्याय स्वाहेति स्थले अग्नये स्वाहा इदमग्नये नमम। संकल्पे सायमौपासनहोमं करिष्ये। विसर्जने अनेन सायमौपासनहोमेन इत्येतावान् विशेषः ॥

अथ आरात्रिक विधिः ॥

आरतिः पञ्चाङ्गः दीपमालिकया प्रथमः। जलपूर्णशंखेन द्वितीयः। धौत वस्त्रेण तृतीयः। पल्लवेन चतुर्थः। पल्लवाभावे पुष्पेण विल्व पत्रेण वा। साष्टाङ्ग प्रणामः पञ्चमः ॥ एतानि तिष्ठन् देवस्याग्रे भ्रामयेत्। भ्रामण संख्या च।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आदौ चतुष्पादतल प्रदेशे द्विर्नाभिदेशे मुखमण्डलेत्रिः ॥
सर्वेषुचांगेषु च सप्तवारान् आरात्रिकं भक्तजनः प्रकुर्यात् ॥
एवं घण्टानाद पूर्वकं आरतिं कृत्वा शंखनादं कृत्वा स्तुतीः कुर्यात् ॥
करुणापारावारं कलिमलपरिहारम्, कद्रूसुत शयितारंकरधृतकल्हारम् ॥
घनपटलाभशरीरं कमलोद्भवपितरं, कलयेविष्णुमुदारं कमलाभर्त्तारम् ॥
जयदेव जयदेव जयकेशव हर गजमुख सवित
नंगतनयेऽहं चरणौ तव कलये । जयदेव जयदेव ॥
भूधरजारतिलोलंमङ्गलकरशीलम्, भुजगेशस्मृतिलालंभुजगावलिमालम्॥
भूषाऽकृतिमतिविमलं संधृतगाङ्गजलं, भूयोनोमिकृपालुं भूतेश्वरमतुलम्॥
जयदेव जयदेव जयकेशव हरगजमुख सवित
नंगतनयेऽहं चरणौ तव कलये । जयदेव जयदेव ॥
विघ्नारण्यहुताशंविहितानयनाशं, विपदवनीधरकुलिशं विधृतांकुशपाशम्॥
विजयार्कज्वलिताशंविदलितभवपाशं, विनतास्मोवयमनिशंविद्याविभवेशम्
जयदेव जयदेव जयकेशव हर गजमुख सवित
नंगतनयेऽहं चरणौ तव कलये । जयदेव जयदेव ॥
कश्यपसूनुमुदारं कालिन्दीपितरं, कालत्रितय विहारं कामुक मन्दारम्॥
कारुण्याब्धिमपारं कालानरमदरं, कारणतत्त्वविचारं कामयऊष्भकरम् ॥
जयदेव जयदेव जयकेशव हर गजमुख सवित
नंगतनयेऽहं चरणौ तव कलये । जयदेव जयदेव ॥
निगमैर्नुत पदकमले निहतासुरजाले, हस्तेधृतकरवाले निर्जरजनपाले॥
नितरीकृष्णकृपालेनिरवधिगुणलीले,निर्जरनुतपदकमलेनित्योत्सवशीले॥
जयदेव जयदेव जयकेशव हर गजमुख सवित
नंगतनयेऽहं चरणौ तव कलये । जयदेव जयदेव ॥
इति आरात्रिक विधिः ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ मन्त्र पुष्पाञ्जलिः ॥

ओं यज्ञेन यज्ञ मयजन्त देवा स्तानि धर्म्माणि प्रथमान्यासन् ।
तेहनाकं महिमानः सचन्त यत्रपूर्वे साध्याः सन्तिदेवाः ॥

ओं राजाधिराजाय प्रसह्य साहिने नमोवयं वैश्रवणाय कुर्म्महे । समेकामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु । कुवेराय वैश्रवणाय महाराजाय नमः । ओं स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्ता दापरार्धात पृथिव्यै समुद्र पर्यन्ताया एकराडितितदप्येषश्लोकोऽभिगीतो मरुतःपरिवेष्टारो मरुत्तस्यावसन्गृहे। आविक्षितस्य कामप्रे विश्वेदेवाः सभासद इति । ओं विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो वाहुरुतविश्वत स्पात्। सम्वाहुभ्यान्धमति-सम्पतत्रै र्द्यावाभूमी जनयन्देवएकः ॥ ओं तत्पुरुषाय विद्महे वासु-देवाय धीमहि । तन्नोविष्णुः प्रचोदयात् ॥ ओं साङ्गेभ्यः सपरिवा-रेभ्यः सायुधेभ्यः सवाहनेभ्यः सशक्तिकेभ्यः श्रीविष्णुपंचायतन देवताभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

शयने प्रार्थना ॥

ओं सुप्तसुप्त जगन्नाथ सुप्तस्त्वं मधुसूदन ।
लक्ष्मी सरस्वती युक्तोन निद्रां कुरु जनार्दन ॥
ओं नमो ब्रह्मण्य देवाय गो ब्राह्मण हिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ओं तत्सत् ओं तत्सत् ओं तत्सत् परब्रह्मणे नमः
हरिः ओम् ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

11/23

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi